S.K.M. 104/89 (B)

श्रीधर स्वामी विरचिता भावार्थ दीपिका

द्वितीय स्कंध:

समय १८३७

पत्र ४४

लि० स्थान लोहार्गल तीर्थ

लि० कर्ता बालकृष्ण

श्रीराधाकृष्णवल्लभोजयति

पुस्तकश्रीमद्भागवतको सकंधद्वितीयपत्रारिण ७४

पुस्तक लोहार्गल्लके महंत श्री स्वामीजी श्रीचैतन्यदासजी को

भा० द्वि०
१
म

॥ श्रीरामजी ॥ द्वितीये तु दशाध्यायैः श्रीभागवतमादितः ॥ उद्देशलक्षणोक्तिभ्यां संक्षेपेणोपवर्ण्यते ॥१॥ तत्र तु प्रथ-
मेऽध्याये कीर्तनश्रवणादिभिः ॥ स्थविष्ठे भगवद्रूपे मनसो धारणोच्यते ॥२॥ यन्नामकीर्तनं दानतपोयोगादिसत्फलं ॥ तं नित्यं प-
रमानंदं हरिं नर नंस्मर ॥३॥ उक्तः पूर्वमुपोद्घातप्रसंगः शुकागमः ॥ राज्ञा पृष्टं नृणां कृत्यमथाह शुकविन्मुनिः ॥४॥ अथ द्वि-
तीयस्कंधव्याख्या ॥ राज्ञः प्रश्नमभिनंदति ॥ वरीयानिति ॥ त्वया पुंसां श्रोतव्यादिषु मध्ये परः ॥ प्रश्नः कृतः । एष एव वरीयान् ।

॥ ॐ नमो भगवते वासुदेवाय ॥ श्रीशुक उवाच ॥ वरीयानेषते प्रश्नः कृतो लोकहितो नृप ॥ आ-
त्मवित्संमतः पुंसां श्रोतव्यादिषु यत्परः ॥१॥ श्रोतव्यादीनि राजेंद्र नृणां संति सहस्रशः ॥ अपश्यता-
मात्मतत्वं गृहेषु गृहमेधिनां ॥२॥ निद्रया ह्रियते नक्तं व्यवायेन च वा वयः ॥ दिवा चार्थेहया राजन्
कुटंबभरणेन वा ॥३॥

नृप यतो लोकहितम् एतत् मोक्षहेतुत्वात् ॥ आत्मविदां मुक्तानां च संमतो यतः । तत्र तावत्स्वाभाविकक्रियाणामनर्थहेतुत्वं व-
दन् ॥ ब्रूहि यद्वा विपर्ययमित्यस्योत्तरमाह ॥ श्रोतव्यादीनि इति त्रिभिः ॥१॥ गृहेषु आसक्तानां अत एव गृहमेधिनां तदुक्तं पंचसू-
नापराणां मेधातिहिंसा धर्मः ॥ तेषां वृथा आयुर्भवतीत्याह ॥२॥ नक्तं रात्रौ यद्वयः आयुः । निद्रया व्यवायेन रत्या ह्रियते दिवा
॥ अह्नि यद्वयः । तदर्थेहया अर्थार्थमुद्यमेन ॥ कुटुंबपोषणेन वा ॥ चकारावनुक्तसमुच्चयार्थौ ॥३॥ ॥ श्री ॥ ॥ १

ननु नश्वरकुटुंबाधैर्यं कथमायुर्व्ययं कुर्यात्तत्राह ॥ देहादिषु आत्मनः ॥ सैन्येषु परिकरेषु असत्सु मिथ्याभूतेष्वपि प्रमत्तः प्र
सक्तः सन् ॥ तेषां पित्रादीनां तेन नाशं पश्यन्नपि नानुसंधत्ते ॥४॥ एवं विपर्यये प्रश्नोत्तरमुक्त्वा श्रोतव्यादि प्रश्नोत्तरमाह
हे भारत भरतवंश्य ॥ सर्वात्मेति श्रेष्ठत्वमाह ॥ भगवानिति सौंदर्यं ईश्वर इत्यावश्यकत्वं हरिरिति बंधहरित्वं ॥ अभयं मोक्ष
मिच्छता ॥५॥ अतः परमन्यत् श्रेयो नास्तीत्याह ॥ एतावानेव जन्मनो लाभः फलमित्याह ॥ नारायणस्मृतिरिति ॥ सांख्यादि

देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि ॥ तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ॥४॥ तस्माद्भा
रत सर्वात्मा भगवान् हरिरीश्वरः ॥ श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयं ॥५॥ एतावान्सां
ख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ॥ जन्मलाभः परः पुंसामंते नारायणस्मृतिः ॥६॥ प्रायेण मुनयो
राजन् निवृत्ता विधिनिषेधतः ॥ नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेः ॥७॥ इदं भागवतं ना
मपुराणं ब्रह्मसंमितं ॥ अधीतवान् द्वापरादौ पितुर्द्वैपायनादहं ॥८

भिः साध्य इति ॥ सांख्यं आत्मानात्मविवेकः । योगः अष्टांगः ॥ ताभ्यां तत्स्मृतिः ॥ परो लाभः तन्महिमानं वक्तुमशक्य इत्यर्थः
॥६॥ तत्र सदाचारं प्रमाणयति विधिनिषेधतः विधिनिषेधाभ्यां निवृत्ताः ॥ नैर्गुण्ये ब्रह्मणि स्थिता अपि ॥७॥ प्रसिद्धं म
म किमिदमपूर्वं कथयसि तत्पूर्वमेवेदमित्याह ॥ इदं भागवतं भगवत्प्रोक्तं नामैकं प्रधानं पुराणं सर्ववेदतुल्यं
॥ ब्रह्मसम्यक्मितं येन कृतस्त्वयाप्राप्तमत आह अधीतवानिति ॥८॥

भा० द्वि० २

ननुसिद्धस्यतवकुतोध्ययनेप्रवृत्तिस्तत्राह निगृहीतचेता आकृष्टचित्तः ॥ ९ ॥ महापुरुषो विष्णुः तदीयः यत्र यस्मिन्
श्रद्धांकुर्वतांसतांसतीअहैतुकी ॥ १० ॥ सिद्धानांसाधकानांचनातःपरमन्यत्श्रेयोस्तीत्याह ॥ इच्छतांकामिनांतत्तत्फ
लसाधनमेतदेव ॥ योगिनांज्ञानिनांफलंचैतदेवनिर्णीतंनात्रप्रमाणंवक्तव्यमित्यर्थः ॥ नत्वल्पमेवायुरवशिष्टं
किमहंसाधयेयमितिमाशुचइत्याह ॥ परोक्षैः ॥ स्वाज्ञातेर्हायनैर्वर्षैः विदितंवृथायातीतिविज्ञातंयेनज्ञानेनघटते

परिनिष्ठितोपिनैर्गुण्ये उत्तमश्लोकलीलया ॥ गृहीतचेताराजर्षे आख्यानंयदधीतवान् ॥ ९ ॥ तद
हंतेभिधास्यामिमहापौरुषिकोभवान् ॥ यस्यश्रद्दधतामाशुस्यान्मुकुंदेमतिःसति ॥ १० ॥ एतन्निर्वि
द्यमानानामिच्छतामकुतोभयम् ॥ योगिनांनृपनिर्णीतंहरेर्नामानुकीर्त्तनं ॥ ११ ॥ किंप्रमत्तस्यबा
हुभिः परोक्षैर्हायनैरिह ॥ वरंमुहूर्त्तंविदितंघटेतश्रेयसेयतः ॥ १२ ॥ खट्वांगोनामराजर्षिर्ज्ञा
त्वेयंतामिहायुषः ॥ मुहूर्त्तात्सर्वमुत्सृज्यगतवानभयंहरिं ॥ १३ ॥ तवाप्येतर्हिकौरव्यसप्ताहंजीविता
वधिः ॥ उपकल्पयतत्सर्वंतावद्यत्सांपरायिकं ॥ १४ ॥

तयत्नंकरोति ॥ १२ ॥ खट्वांगोहिदेवपक्षेस्थित्वादैत्यानजयत्ततः ॥ प्रसन्नैर्देवैर्वरंवृणीष्वेत्युक्तेततस्तेनोक्तं ॥ प्रथमं
तावन्ममायुःकथ्यतामिति ॥ ततोदेवैरुक्तं ॥ तत्तुमुहूर्त्तमस्तीति ॥ ततोतिशीघ्रंविमानेनमनुष्यमागत्यहरिंशरणं
गतइति ॥ १३ ॥ तवतुएतर्हिअपिइदानीमपितावत्इतितावताकालेनसांपरायिकंपारलौकिकंसाधनंसंपा ३

तत्र वैराग्यं तावदाह॥ गतसाध्वसः मृत्युभयशून्यः असंगो नाम अनासक्तिः। तेन शस्त्रेण स्पृहां सुखेच्छां॥ तं देहमनु ये पुत्रकलत्रादयः॥ तेषु च स्पृहां छिंद्यात्॥१५॥ गृहात्प्रव्रजितः निर्गतः॥ गृहे स्थितस्य पुनरप्यासक्तिसंभवात्॥ तत्राष्टांगयोगमाह॥ धीर इति ब्रह्मचर्यादियमोपलक्षणं॥ पुण्यतीर्थेति स्नानादिनियमोपलक्षणं॥ आसनमाह॥ शुचाविति॥ विविक्ते एकांते विधिवत् कुशाजिनचैलैः क्रमेण निर्मिते॥१६॥ जप[illegible]गर्भप्राणायामं

अंतकाले तु पुरुष आगते गतसाध्वसः॥ छिंद्यादसंगशस्त्रेण स्पृहां देहेनु ये च तं॥१५॥ गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः॥ शुचौ विविक्त आसीनो विधिवत्कल्पितासनः॥१६॥ अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परं॥ मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन्॥१७॥ नियच्छेद्विषयेभ्योक्षान् मनसा बुद्धिसारथिः॥ मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया॥१८॥

वक्तुं जप्यमाह॥ त्रिवृत् त्रिवृत् अकारादित्रिवृत्तितं गुणितं ब्रह्माक्षरं प्रणवं मनसा अभ्यसेत्। मनसा इंद्रियप्रत्याहारं कृत्वा प्राणायामेन मनोनियमनमाह॥ मनो नियच्छेत्॥ ब्रह्मबीजं प्रणवं॥ अविस्मरन् एवं जितश्वासः सन्॥१७॥ प्रत्याहारमाह नियच्छेत् अक्षान् इंद्रियाणि निश्चयात्मिका बुद्धिः सारथिर्यस्य सः॥ धारणामाह॥ मन इति पुनश्च कर्मभिस्तद्वासनाभिराक्षिप्तमाकृष्टं शुभार्थे भगवद्रूपे॥१८॥

भा० द्वि०

३

ध्यानमाह ॥ एकमेकं पादाद्यवयवं ॥ अव्युच्छिन्नेन समग्ररूपाद्विमुक्तेराश्रयविशेषे सामान्यतः ॥ चित्त
स्थिरी[illegible]करणं धारणा ॥ अवयवचिंतनात्मकं ध्यानमाह ॥ इति भेदः समाधिमाह
निर्विषयं मनो युक्त्वा समाधाय स्थिरीकृते मनसि स्फुरदानंदमात्राकारं कृत्वेत्यर्थः ॥ १९ ॥ प्रसीदति उपशाम्य

तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा ॥ मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत् ॥ १९ ॥ प
दं तत्परमं विष्णोर्मनो यत्र प्रसीदति ॥ रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः ॥ २० ॥ यच्छेद्धा
रणया धीरो हंति या तत्कृतं मलं ॥ यस्यां संधार्यमाणायां योगिनो भक्तिलक्षणः ॥ आशु संपद्यते
योग आश्रयं भद्रमीक्षतः ॥ २१ ॥ राजोवाच ॥ यथा संधार्यते ब्रह्मन् धारणा यत्र संमता ॥ या
दृशी वा हरेदाशु पुरुषस्य मनोमलं ॥ २२ ॥ श्रीशुक उवाच ॥ जितासनो जितश्वासो जित
संगो जितेंद्रियः ॥ स्थूले भगवतो रूपे मनः संधारयेद्धिया ॥ २३ ॥

ति ॥ गुणवशात्पुनरपि क्षोभे स
ति धारणामेव स्थिरीकुर्यादित्याह ॥ रजसाक्षिप्तं तमसा विमूढं स्वयं मनो निरुंध्यात् ॥ तत्कृतं रज
स्तमोभ्यां कृतं ॥ २० ॥ यत्र यस्यां क्रियमाणायां नंदसुखात्मकविषयं प्रत्युत ॥ तत्रैव भक्तिर्भवति ॥ २१ ॥ या
प्यत्र यादृशी च कर्त्तव्यता ॥ विषयतद्विशेषाणां प्रश्नं यच्छति ॥ अस्योत्तरं जितासन इति विषयमाह ॥
स्थूले विराट्रूपे ॥ २३ ॥

३

विशेषो विराट्देहः अतिस्थूलतरः सुद्दितिकार्यमाह ॥ अस्य चोपलक्षणत्वेन विषयत्वं वस्तु विराट्जीवनियंता भगवा
न एव विषय इत्याह ॥२४॥ आंडकोशोंतर्वर्त्तिनी कथामाह ॥ एकं पृथिव्यावरणं । ततः अपतेजोवाय्वाकाशाहंकार
महतत्वानीति सप्त ॥२५॥ विराट्देहजीवतदंतर्यामिणामभेदमारोप्योपासना कर्त्तव्येत्याशयेनाह । पातालमिति
पादमूलं पादस्याधोभागं पातालादीनां तदवयवता विधीयते ॥ पातालादितलानि तानि अधस्तलादारभ्य सप्त विवरा

विशेषस्तस्य देहोयं स्थविष्ठश्च स्थवीयसां ॥ यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च सत् ।२४॥ आंडकोशे शरी
रेस्मिन् सप्तावरणसंयुते ॥ वैराजपुरुषो योसौ भगवान् धारणाश्रयः ॥२५॥ पातालमेतस्य हि पादमू
लं पठंति पार्ष्णिप्रपदे रसातलं ॥ महातलं विश्वसृजोथ गुल्फौ तलातलं वै पुरुषस्य जंघे ॥२६॥ द्वे जानु
नी सुतलं विश्वमूर्त्तेरूरुद्वयं वितलं चातलं वा ॥ महीतलं तज्जघनं महीपते नभःस्थलं नाभिसरो गृणं
ति ॥२७॥ उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोस्य । तपो वराटीं विदुरादिपुंसः सत्यं तु
शीर्षाणि सहस्रशीर्ष्णः ॥२८॥

णि पठंति गृणंति इत्यादि प्रमाणदर्शनं ॥ पार्ष्णिप्रप दे पादस्य पश्चात्पुरोभागौ ऊरू
द्वयं भागो वितलं उत्तरभागो तलमिति ज्ञेयम् ॥२६॥ नाभिरेव सरः ।२७। ज्योतिषामनीकं ज्योतिश्चक्रं सह स्वर्गं ॥ मह
र्लोकं ग्रीवा ॥ तपोलोकं वराटं ललाटं ॥ सत्यं सत्यलोकः ।२८॥ उस्रा देवाः । तेजोमयशरीरत्वात् ॥ तानेवाह बाहव इत्या
हुः ॥ दिशः अस्मदादिश्रोत्राधिष्ठात्र्यो देवताः । कर्णौ श्रोत्रस्याधिष्ठातारौ शब्दस्तु श्रोत्रविषयः ॥ स तस्य श्रोत्रं इंद्रि
य एवं नासिकादिष्वपि नासत्यदस्रावश्विनौ ॥ नासे नासापुटे इद्धः दीप्तः ।२९॥

भा० टि० ४

द्यौः अंतरिक्षं ॥ अक्षिणी नेत्रयोर्गोलके चक्षुरयं पतंगः । सूर्यः । अहनी रात्र्यहनी ॥ परमेष्ठि धिष्ण्यं ब्रह्मपदं । तालु अ-
धिष्ठानं तिह्वाइंद्रिय ३० छंदांसि वेदाः ॥ शिरो ब्रह्मरंध्रं स्नेहकलाः पुत्रादिस्नेहकलादिज्ञानि दंताः ॥ बंधत्वमार्थः दु-
रंतपारं स उद्दति ॥ यतः स तस्य कटाक्षं ॥ ३१ ॥ अधर्ममार्गो यस्य पृष्ठभागः ॥ कः । प्रजापतिर्मित्रो मित्रावरुणौ

इन्द्राद यो वाहव आहुरुस्याः कर्णौ दिशः श्रोत्रममुष्य शब्दः ॥ नासत्यदस्रौ परमस्य नासे घ्राणोस्य गं-
धो मुखमग्निरिद्धः ॥ २९ ॥ द्यौरक्षिणी चक्षुरभूत्पतंगः पक्ष्माणि विष्णोरहनी उभे च ॥ तद्भ्रूविजृंभः
परमेष्ठिधिष्ण्यमापोस्य तालू रस एव जिह्वा ॥ ३० ॥ छंदांस्यनंतस्य शिरो गृणंति दंष्ट्रा यमः स्नेहक-
लाद्विजानि ॥ हासो जनोन्मादकरी च माया दुरंतसर्गो यदपांगमोक्षः ॥ ३१ ॥ व्रीडोत्तरोष्ठोधर ए-
व लोभो धर्मस्तनोधर्मपथोस्य पृष्ठः ॥ कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा गिरयो-
स्थिसंघाः ॥ ३२ ॥ नद्योस्य नाड्योथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेंद्र ॥ अनंतवीर्यः श्वसितं
मातरिश्वा गतिर्वयः कर्म गुणप्रवाहः ॥ ३३ ॥ ईशस्य केशान्विदुरंबुवाहान्वासस्तु संध्यां कुरुवर्य
भूम्नः ॥ अव्यक्तमाहुर्हृदयं मनश्च स चंद्रमाः सर्वविकारकोशः ॥ ३४ ॥

अनंतवीर्यस्य सः वयः
कालः तस्य गमनं ॥ गुणप्रवाहः प्राणिनां संसारः ॥ कर्म तस्य क्रीडा ॥ ३३ ॥ भूम्नः विष्णोः ॥ अव्यक्तं प्रधानं सः
प्रसिद्धः चंद्रमाः तदीयं मनः ॥ सर्वेषां विकाराणां कोश इव आश्रयः यतः ॥ सोपि सर्वविकारकोश ४

[illegible] ॥

विज्ञानशक्तिं चित्तं महिमामनंतिमहतत्वं॥ अंतःकरणं गिरित्रं श्रीरुद्रं अहंकारं वाचामुत्पत्तिस्थानं अश्वतरी ३५॥ वयां
सि पक्षिगणाः तस्य व्याकरणं नाम स्वरूपं व्याकरणं वाणीति श्रुत्युक्तं शिल्पनैपुण्यं॥ यथाहुः। येन शुक्लीकृता हंसाः शुका
श्च हरितीकृताः मयूराश्चित्रिता येन स नो वृत्तिं विधास्यति मनुः॥ स्वायंभुवः मनीषा बुद्धिः। मनुजः पुरुषं निवासः
आश्रयः पुरुषत्वेवाविस्तारा मानमेति श्रुतेः गंधर्वादीनां हृद्रैक्यं॥ गंधर्वादयः॥ स्वरस्मृतीः षड्जादिस्वरस्मृतयः इत्य

विज्ञानशक्तिं महिमामनंतिसर्वात्मनोंतःकरणं गिरित्रं॥ अश्वाश्वतर्युष्ट्रगजानखानि सर्वे मृगाः प
वः श्रोणिदेशे॥ वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा मनुजो निवासः गंधर्वविद्याधरचारणाप्स
रः॥ स्वरस्मृतीरसुरानीकवीर्यः॥ ३६॥ ब्रह्माननं क्षत्रभुजो महात्मा विडूरुरंघ्रिश्रितकृष्णवर्णः।
नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः कर्मवितानयोगः॥ ३७॥ इयानसावीश्वरविग्रहस्य यः स
न्निवेशः कथितो मया ते॥ संधार्यतेस्मिन्वपुषि स्थविष्ठे मनः॥ स्वबुद्ध्या न यतोस्ति किंचित् ३८॥

र्य॥ असुरानीकवीर्यपाठे असुरानीकवीर्यस्येश्वरः यद्वा॥ असुरसमूहश्रेष्ठः प्रह्लादः स्मृतिर्यस्येति ३६॥ ब्रह्मवि
प्रश्च आननं मुखं क्षत्रं क्षत्रियो भुजो यस्य विट् वैश्यः ऊरू यस्य॥ अंघ्रिश्रितं कृष्णवर्णः शूद्रो यस्य नानाभिधाना
नि येषां ते च अभीज्याः देवता वा तेषां गणैर्वसुरुद्रादिभिरुपपन्नो युक्तः॥ द्रव्यात्मको हविःसाध्यः वितानयोगो यज्ञ
प्रयोगः तस्य कर्म कार्यः स्वरूपकः॥ अभिप्रेत इत्यर्थः॥ ३७॥ इयानेतावान् संनिवेशः अवयवसंस्थानं अस्मिन्
स्वबुद्ध्या मनः संधार्यते मुमुक्षुभिः॥ यतो व्यतिरिक्तं किंचिन्नास्ति तस्मिन् तदेवं चित्तस्थैर्यार्थं विराट्देहद्वीवेश्वरा

णामनेदोपासनमुक्तं तत्र तु देहद्वीवादीश्वरेऽखिला
पेम एव ध्येय इति निर्द्धारयति ३८॥

भा॰ द्वि॰
५

स घाति ॥ सर्वं सांधीवृत्तिं निरनुभूतं सर्वं येन स एक एव स सर्वांतर आत्मा तमेव सत्यं भजेत् ॥ अन्यत्र उपलक्षणेन सङ्को
त् ॥ यतः आ संजात आत्मनः परतः संसारो भवति ॥ एकस्य तत्त्व दृष्टि द्वयैः ॥ सर्वानुभूतो दृष्टांतः ॥ स्वप्न इति नानामीह
याय येति ॥ स्वप्ने हि कदाचित् बहून् देहान् प्रकल्प्य जीवस्तत्तद्दृष्टि द्वयैः ॥ सर्वं पश्यतीति भूत ॥ ईश्वरस्य तु विद्या
शक्तित्वान्न बंधः ॥३९॥ इति द्वितीये टीकायां प्रथमः ॥१॥ द्वितीये तु ततः स्थूल धारणातो डितं मनः ॥ सर्वसा

स सर्वधीवृत्त्यनुभूत सर्व आत्मा यथा स्वप्नजनेक्षितैकः ॥ तं सत्यमानंदनिधिं भजेत नान्यत्र सज्जेद्य
तस्त्मपातः ॥३९॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे पुरुषसंस्थावर्णनो नाम प्रथ
मोध्यायः ॥ १॥ श्रीशुक उवाच ॥ एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् ॥ तथा
ससर्जेदममोघदृष्टिर्यथाप्ययात् प्राक् व्यवसाय बुद्धिः ॥१॥

क्षिणि सर्वे त्रो विक्षोधार्यमितीर्यते ॥ १ ॥ हस्यालंबनरूपे व मुक्ता वैराड् धारणा ॥ इहोच्यते तु तत्साध्या स
र्वांतर्यामि धारणा ॥ ५ ॥ तत्र तावत् पूर्वोक्ता धारणाया विश्वसृष्टि सामर्थ्यं भवति ॥ अवांतर फलमाह ॥ ५ ॥ एवं पु
राधारणात यातुष्टात् हरेः ॥ पुरा प्रलयसमयेन ष्टां सृष्टि स्मृतिं प्रत्यवरुध्य लब्ध्वा अप्ययात् प्राक् इदं विश्वं य
था स सर्ज ॥ व्यवसायात्मिका बुद्धिर्यस्य ॥ अत एवामोघदृष्टिः यस्येति ॥ अतस्तया धारणया विश्वसृष्टि साम ५

उपासनाफलादपि विरक्तस्य शुद्धात्म धारणायामधिकारः अतो वैराग्यार्थं सर्वं कर्मफलं निंदयति ॥ शाब्दस्ये
ति ॥ शाब्दं शब्दमयं ब्रह्म वेदः तस्यैव पंथाः कर्मफलवोधनप्रकारः कोसौ अर्थं अन्यैरेव स्वर्गादिनाम्नि ध्यायति
तत्तद्विषयं करोति एतदपार्थत्वमेवाह ॥ तत्र मायामये ध्यायन् सुखमिति वासनया ब्राम्यन् ॥ तर्हि कर्मफ
लत्यागे सति एव देहयात्रा स्यादित्याशंक्याह ॥ अतः कविर्नाममात्रेषु न्नोगेषु यावदर्थेन अर्थो देहनिर्वाहो

शब्दस्य हि ब्रह्मण एष पंथा यन्नामभिर्ध्यायति धीरपार्थैः ॥ परिभ्रमंस्तत्र न विंदतेर्थान्मायामयेवासनया ब्राम्यमानः ॥ ३ ॥ अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायवुद्धिः ॥ सिद्धे न्यथार्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः ॥ ४ ॥ सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपवर्हणैः किं ॥ सत्यंजलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः ॥ ६ ॥ चीराणि किं पथि न संति दिशंति भिक्षां नैवांघ्रिपाः परभृतः सरितोप्यशुष्यन् ॥ रुद्धा गुहाः किमजितोवति नोपसन्नान् कस्माद्भजंति कवयो धनदुर्मदांधान् ॥ ५ ॥

यस्य तावान् तः स्यात् ॥ अप्रमत्तः तावन्मात्रेष्वनासक्तः व्यवसा
यवुद्धिर्नेदं सुखमिति निश्चयवान् ॥ तदापि तत्र तस्मिन्नर्थे अन्ययैव सिद्धे सति तत्परिश्रमं पश्यन्न यतेत ॥ श्र
न्यथासिद्धिमाह ॥ वाहू सत्यां सत्यामिति कशिपोः शय्यायाः स्वत एव सिद्धे वाहौ सति उपवर्हणैः उपधानैः पुरु
धा बहुप्रकारया ॥ अन्नपात्र्या भोजनपात्रेण ॥ ६ ॥ ननु दिक् वासः नोनाम नग्नत्वमेव न वल्कलेम न्नतोयवासस्था
नं च याच्या प्रयत्नं विना कथं प्राप्येतेत्याह ॥ चीराणि वस्त्रखंडानि परान् विभ्रति पुष्णंति फलादिभिः ये गुहा गिरि
दर्यः ननु कदाचिदेवं स्यादेवं किं कार्यं तत्राह अजितो हरिः ... नान्नक स्मात् इति किं नाथ तिनरहेति किं

[illegible]

भा० द्वि०
६

ततः किं कर्त्तव्यं हरिस्तु सेव्य इत्याह ॥ एवं विरक्तः सन् नितरां भजेत् भजनीयत्वे हेतवः ॥ स्वचित्ते स्वत एव सिद्धः यतः आत्मा अत ए-
व प्रियः प्रियस्य च सेवा सुखरूपैव ॥ अर्थश्च सत्यः ॥ न त्वनात्मवन्मिथ्या भगवान् भजनीयगुणश्च अनन्तश्च नित्यः यत ए-
वमतः ॥ तं भजेत् नियतार्थः निश्चलरूपः तदनुभवानंदेन निर्वृतः सन् निर्वृतिः स्वतः सुखात्मत्वं दर्शितं किंच ॥ यत्र यस्मिन् भज-
ने सति संसारहेतोरविद्याया उपरमो नाशो भवति ॥ ६ ॥ एतदेवान्यचिंतानिंदया दृढयति क इति ॥ तां तथाभूतां परस्य हरेरनु-
चिंतां धारणामनादृत्य पशून् ·· कर्म्मजान् विनाशाय पशुरेव स देवानामिति ॥ ऋते ः असती विषयचिंतां को नाम कुर्यात्

एवं स्वचित्ते स्वत एव सिद्ध ः ॥ आत्मा प्रियोऽर्थो भगवाननंतः ॥ तं निर्वृतो नियतार्थो भजेत संसारहेतूपरम
श्च यत्र ॥ ६ ॥ कस्तां त्व·नादृत्य परानुचिंतामृते पशूनसतीं नाम कुर्यात् ॥ पश्यंजनं पतितं वैतरण्यां स्व
कर्म्मजान् परितापान् जुषाणं ॥ ७ ॥ केचित् स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतं ॥ चतुर्भु
जं कंजरथांगशंखगदाधरं धारणया स्मरंति ॥ ८ ॥

त ॥ तया अचिंतया वैतरण्यां पतितं जनं च स्वकर्म्मजान् परितापान् आध्यात्मिकादिक्लेशान् सेवमानं पश्यन् वैतरणी यम
द्वारस्था नदी तत्तुल्यत्वात् संसृतिर्वैतरणी ॥ ७ ॥ तामेव धारणं सविशेषणमाह ॥ केचिदिति षड्भिः ॥ स्वदेहस्यांतर्म
ध्ये यत् हृदयं तत्र यो अवकाशस्तस्मिन् वसंतं प्रादेशस्तर्जन्यंगुष्ठयोर्विस्तारः ॥ स एव मात्रा प्रमाणं यस्येति हृदये परि ६
माणं तत्रोपचर्यते कंजं पद्मं रथांगं चक्रं ॥ ८ ॥

नलिनं पद्मं तद्वत् प्रसन्ने आयते दीर्घे ईक्षणे यस्य ॥ कदंबकुसुमस्य किंजल्काः ॥ केसरास्तद्वत्पिशंगे पीते वाससी यस्य लसं-
ति महारत्नानि च येषु तानि सुवर्णमयान्यंगदानि यस्य स्फुरंति चलंति महारत्नानि च रत्नमयानि किरीटकुंडलानि यस्य ॥९॥ उ-
न्निद्रं विकसितं यत् हृत्पंकजं तस्य कर्णिकैव आलयः स्थानं तस्मिन् योगेश्वरैः स्थापितौ पादपल्लवौ यस्य ॥ श्रीरेव लक्ष्मं चि-
ह्नं तद्युक्तं पामादि विहितो मत्वर्थीयो नप्रत्ययः ॥ कौस्तुभरत्नं कंधरायां यस्य ॥ अम्लाना लक्ष्मीः ॥ शोभा यस्याः तया वनमा-

अप्रसन्नवक्त्रं नलिनायतेक्षणं कदंबकिंजल्कपिशंगवाससं ॥ लसन्महारत्नहिरण्मयांगदं स्फुरन्महार-
त्नकिरीटकुंडलं ॥९॥ उन्निद्रहृत्पंकजकर्णिकालये योगेश्वरास्थापितपादपल्लवं ॥ श्रीलक्ष्मणं कौस्तुभ-
रत्नकंधरं अम्लानलक्ष्म्या वनमालयाचितं ॥१०॥ विभूषितं मेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः ।
स्निग्धामलाकुंचितनीलकुंतलैर्विरोचमानाननहासपेशलं ॥११॥ अदीनलीलाहसितेक्षणोल्लसद्भ्रूभं-
गसंसूचितभूर्यनुग्रहं ॥ ईक्षेत चिंतामयमेनमीश्वरं यावन्मनो धारणयावतिष्ठते ॥१२॥ एकैकशोंगानि धि-
यानुभावयेत्पादादि यावद्धसितं गदाभृतः । जितं जितं स्थानमपोह्य धारयेत्परं परं शुद्ध्यति धीर्यथा यथा ॥१३॥

लया अर्चितं व्याप्तं ॥१०॥ स्निग्धत्वादिविशिष्टैः कुंतलैर्विरोचमाने ॥ आनने यो हासः तेन पेशलं सुंदरं ॥ अदीनमुदारं यल्ली-
लाहसितं तेन ॥ यदीक्षणं तस्मिन् उल्लसंतौ ये भ्रूभंगाः भ्रूविक्षेपास्तैः संसूचितो भूरिरनुग्रहो येन चिंतामयं चित्ता-
त्मविनिर्मितं ॥१२॥ अस्यैव ध्यानमाह ॥ एकैकश इति ॥ अनुभावयेत् चिंतयेत् ॥ पश्चाज्जितं अयत्नतः स्फुरंतं पादगुल्फा-
दिस्थानं अथ तत्तदपोह्य त्यक्त्वा परं जंघाजान्वादि धारयेत् ध्यायेत् ॥ शुद्ध्यति तस्मिन्निश्चला भवति ॥१३॥

भा० द्वि० ७ पूर्वोक्तराद्धारणायाः एतत्फलं गत्वमाह ॥ यावदिति परे ब्रह्मादयोऽवरे यस्मात् कुतः ॥ विश्वेश्वरे द्रष्टरि तु दृश्ये चैतन्य
घनत्वात् भक्तियोगः प्रेमलक्षणः क्रियावसाने आवश्यककर्मानुष्ठानानंतरं अनेन कर्मार्पितभक्तियोगपर्यंतमेवेत्यु
क्तं ॥१४॥ एवं तावत् आसनमृत्योः पुंसः कृत्यमुक्तं ॥ इदानीं तस्यैव स्वयं ॥ देहं त्यक्तुमिच्छतः ॥ कृत्यमाह स्थिरमिति साध
ईश्वत्विनिः ॥ अंग हे राजन् एवं भूतो यतिर्यदा इमं लोकं देहं जिहासुः ॥ हातुमिच्छति तदा देशे पुण्यक्षेत्रे काले च शुभ

यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः ॥ तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने
प्रयतः स्मरेत ॥१४॥ स्थिरं सुखं चासनमाश्रितो यतिर्यदा जिहासुरिममंगलोकं ॥ काले च देशे च मनो भा
न सज्जयेत् प्राणान् नियच्छेन्मनसा जितासुः ॥१५॥ मनः स्वबुद्ध्यामलया नियम्य क्षेत्रज्ञ एतां निनयेत्तमा
त्मनि ॥ आत्मानमात्मन्यवरुध्य धीरो लब्धोपशांतिर्विरमेत कृत्यात् ॥१६॥

नायनादौ न सज्जयेत संगं न प्रापयेत न देशकालौ योगिनः ॥ सिद्धिहेतु किंतु योग एवेति दृढनिश्चयो भूत्वा स्थिरं सुख
भास कारं च संनमास्थितः ॥ प्राणान् निरुंध्यादित्यर्थः ॥ एतां बुद्धिं क्षेत्रज्ञे बुद्ध्यादिद्रष्टरि निनयेत विप्रलापयेत् तं च क्षेत्रज्ञं आत्मनि शु
द्धे तं च शुद्धमात्मनि ब्रह्मणि अवरुध्य एकीकृत्य लब्धोपशांतिः प्राप्तनिर्वृत्तिः सन् कृत्याद्विरमेत ततः परं प्राप्याभा ७
वात् तदेवाह न यत्रेति ॥ यत्रात्मस्वरूपे कालो न प्रभुः ॥ किं जगिक तुं न समर्थः ॥ अत एव देवाः न प्रभवंतीत्याह ॥१६॥

अनिमिषाणां देवानां परः कालोपि यत्र न प्रभुः ॥ तत्र कुतो न देवाः प्रभवेयुः देव नियम्यानां जगतां प्राणिनां का वा- ७
र्तेत्याह उग्रत्यामिति ॥ कुतो न प्रभवंतीत्यपेक्षायां निरुपाधित्वादित्याह ॥ न यत्रेति विकारो हंकारः ॥ यद्वा जगत्कार-
णान्यपि न यस्य स्वादौ प्रभवंतीत्याह ॥ २७ ॥ निरुपाधित्वं कुत इत्यत आह ॥ परमिति यद्यस्मात् अतत् आत्मव्य-
तिरिक्तं नेति नेतीत्येवं मुमुक्षवो भिक्षवो दौरात्म्यं देहाद्यात्मत्वं विसृज्य अहं सपर्ज्य साक्षी विष्णोः ॥ पदं पदे पदे

न यत्र कालो निमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे ॥ न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न म-
हान्प्रधानं ॥ २७ ॥ परं पदं वैष्णवमामनंति तत् यन्नेति नेतीत्यतदुत्सिसृक्षवः ॥ विसृज्य दौरात्म्यमनन्यसौ-
हृदा हृदोपगुह्यार्हपदं पदे पदे ॥ २८ ॥ इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरंधिताशयः ॥
स्वपार्ष्णिनापीड्य गुदं ततोनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः ॥ २९ ॥

हृदा उपगुह्य आश्लिष्य तानस्मिन् सौहृदं येषां तथाभूताः संतः तद्वैष्णवं पदं ॥ अत एव परं सर्वतः श्रेष्ठमामनं-
तीत्यन्वयः ॥ २८ ॥ तस्मादित्थं ब्रह्मत्वेन व्यवस्थितो मुनिरुपरमेत तनुं त्यजेत् यदि प्रयास्यन्निति वक्ष्यमाणात् सकाशाद्धि-
रोधं कुर्यात् ॥ तमाह ॥ विज्ञायते अनेनेति विज्ञानं शास्त्रं तेन जाता दृक् ज्ञानं तस्य वीर्यं बलं तेन सुरंधिताः विहिंसिताः ॥
आशयो विषयवासना यस्य सः ॥ इदानीं तस्य देहत्यागप्रकारमाह ॥ स्वपार्ष्णिना पादमूलेन गुदं मूलाधारं आपी-
ड्य अनिरुध्य अनिलं प्राणं उन्नमयेत् ऊर्ध्वं नयेत् जितः क्लमो येन षट्सु स्थानेषु नाभ्यादिषु ॥ नाभ्यां मणिपूरके ॥ स्थि-
तं हृदि अनाहतचक्रे धियोरस्य उरसि कंठादधोदेशस्थिते विशुद्धचक्रे मनस्वी जितचित्तः ॥ स्वनालमूलं त

म

भा०द्वि०
८

रसिकंठादधोदेशस्थितेविशुद्धचक्रेमनस्वीजितचित्तःस्वतालुमूलंतस्यैवचक्रस्याग्रदेशंततोवकुधाग्रमन
संनवाद्धनकैरुन्नं॥२०॥तस्माद्भ्रुवोरंतरंतत्तद्वादशदलपद्मेआज्ञाचक्रेनिरुद्धानिश्रोत्रेनासिकेमुखंचेत्य
वंसप्तप्राणायतनानिप्राणमार्गायेनसः।अनपेक्षःश्चेत्परंब्रह्मगतःसन्मूर्द्धनमूर्द्धानंनिर्भिद्यब्रह्मरंध्रेनिर्भिद्यतदेह
मिंद्रियाणिचविसृजेत्॥२१॥सद्योमुक्तिमुक्त्वाक्रममुक्तिमाह॥यदीतिद्वाभ्यां।यदितुपारमेष्ठ्यंपदंप्रयास्य

नाभ्यांस्थितंहृद्यधिरोप्यतस्मादुदानगत्योरसितंनयेन्मुनिः॥ततोनिसंधायधियामनस्वीस्वताल्
मूलंसनकैर्नयेतत्॥२०॥तस्माद्भ्रुवोरंतरमुन्नयेतानिरुद्धसप्तायतनोनपेक्षः॥स्थित्वामुहूर्त्तार्द्धमकुं
ठदृष्टिर्निर्भिद्यमूर्द्धन्विसृजेत्परंगतः॥२१॥यदिप्रयास्यन्नृपपारमेष्ठ्यंवैहायसानामुतयद्विहारं॥अष्टा
धिपत्यंगुणसन्निवायेसहैवगच्छेन्मनसेंद्रियैश्च॥२२॥योगेश्वराणांगतिमाहुरंतर्बहिस्त्रिलो
क्याःपवनांतरात्मनां॥नकर्मभिस्तांगतिमाप्नुवंतिविद्यातपोयोगसमाधिभाजां॥२३॥

न्नसवति।वैहायसानांखेचराणांसिद्धानांयद्विहारंक्रीडास्थानंकीदृशंअष्टाधिपत्यानिअणिमाद्यैश्वर्याणियस्मिन्
तस्मिन्तदपिप्रयास्यन्तत्रगुणसन्निवायेगुणसमुदायरूपेब्रह्मांडेसर्वत्रेत्यर्थः॥तर्हिदेहत्यागावसरेमनइंद्रि
याणिनत्यजेत्किंतुतैः॥सहैवतल्लोकमार्गंगच्छेत्॥२२॥यतकर्मगतिवन्नयोगगतिः॥परिच्छिनेत्याह।यो
गेश्वराणांत्रिलोक्याःअंतर्बहिश्चगतिमाहुः॥अत्रहेतुःपवनस्यांतः॥ ८
आत्मालिंगशरीरंयेषांमितिविद्याउपासनातयोनगावदूर्मःयोगोष्टांगः।समाधिर्ध्यानंतानयेनजंतियेषां

तमाह वैश्वानरमित्युत्तरेणाः ॥ विहायसा आकाशेन ॥ उच्च ब्रह्मलोकपथेन गतः सन् प्रथमं वैश्वानरं आ
ग्निमभिमानिनीं देवतां याति ॥ केनोपायेन सुषुम्नया नाड्या स्वच्छदेहांतर्वर्तिपिविततास्तीत्याह शोचिषा द्योति
र्मय्या विधूतल्कः कल्को मलं येन सः ॥ क्वाप्यसज्जमान इत्यर्थः ॥ उदस्तात् उपरिष्टात् वर्तमानं हरेः । संबं
धितां गरूपेनारायणाधिष्ठितमित्यर्थः ।२४॥ तद्विश्वनाभिं चक्रं विश्वस्थानानि सूर्यादीन्याश्रयन्तं आविशल्लिं

वैश्वानरं याति विहायसा गतः सुषुम्नया ब्रह्मपथेन शोचिषा ॥ विधूतकल्कोथ हरेरुदस्तात्
प्रयाति चक्रं नृप शैशुमारं ॥२४॥ तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः ॥
नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमंते ॥२५॥ अथो अनंतस्य मुखानलेन दं
दह्यमानं स निरीक्ष्य विश्वं ॥ निर्याति सिद्धेश्वरयुष्टधिष्ण्यं यद्द्वैपरार्ध्यं तदु पारमेष्ठ्यं ॥२६॥

गत्वा ताच्छिन्नबंधनस्तत्पदं त्वं ॥ अतिवर्त्य अतिक्रम्य परतः । स्वर्गिणांगत्यनावादेक एव निर्मलेन लिंगशरीरेण
ब्रह्मविदां स्थानं अन्यैर्नमस्कृतं महर्लोकमुपैति । यद्यस्मिन् विबुधा महाकल्पायुषं ग्वादयः ।२५॥ अथो
अनंतरं कल्पांते विश्वं त्रैलोक्यं अतिशायेन दह्यमानं संनिरीक्ष्य तत्राप्यसहमानः प्राप्तेः । यतद्विपरार्द्धं स्थायित्वात्पा
रमेष्ठ्यं पदं प्रति निर्याति सिद्धेश्वरैर्जुष्टानि निधिष्ण्यानि विमानानि यस्मिन् तत् ॥ इति शेषः सूचि
तं ॥२६॥

भा० टि०
१९

तदेवाह न यत्रेति ॥ आर्तिर्दुःखं उद्वेगो भयं किंतु चित्ततो दहेतोर्यद्दुःखं तेते तदेकं विना तत्कुतो भवति ॥ अनिदं विदां दुरं
नगवतो ध्यानमज्ञानतां प्राणिनां दुरंतदुःखो यः प्रभवो ऽन्मलस्यानुवनुदर्शनात् ॥ तेषां कृपया चित्ततो दोमनं
पीडेति यत् तत्त विना कुतश्चिदपि यत्र शोकाद्यो न शांति ॥ तत्र ब्रह्मलोकं गतानां त्रिधा गतिः ॥ ये पुण्योत्कर्षेण ग
ताः ते कल्पांतरे पुण्यपतारतमेनाधिकारकान्न वृत्ति ॥ ये तु हिरण्यगर्भोपासनाबलेन गताः । ते ब्रह्मणा सह मुच्यंते ये
तु भगवदुपासकाः ॥ ते स्वेच्छया ब्रह्मांडं निर्भिद्य वैष्णवं पदमारोहंति । २७ । तत्र प्रस्तुतस्य भगवद्भक्तस्य ब्रह्मांडभेदन

न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेग ऋते कुतश्चित् । यच्चित्ततोदः कृपयानिदंविदां दुरंतदुःखप्रभ
वानुदर्शनात् ॥ २७ ॥ ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनापोनलमूर्तिरत्वरन् ॥ ज्योतिर्मयो वायुमुपेत्य
कालेवाय्वात्मना खं बृहदात्मलिंगं ॥ २८ ॥

प्रकारमाह तत इत्यादिना । तत्रेयं प्रक्रिया ॥ ईश्वराधिष्ठातायाः प्रकृतेः ॥ केनचिदंशेन महत्तत्त्वं भवति । तस्यांशेनाहं
कारः तस्यांशेन शब्दतन्मात्रद्वारा नभः [redacted] ॥ तस्यांशेन स्पर्शतन्मात्रद्वारा वायुः तस्यांशेन
रसतन्मात्रद्वारा आपः ॥ तदंशेन गंधतन्मात्रद्वारा पृथ्वी तेषु मिलितेषु चतुर्दश भुवनात्मकं विराट् शरीरं तस्य च
पंचाशत्कोटियोजनविशालस्य एषि ब्रह्मांडकटाहविशेषस्य बाह्या कोटियोजनविशाले प्रथमावरणं पंचा
शत्कोटिविशालमित्येके ॥ ततश्चावादीनां यपरिणताः ॥ संज्ञाः तान्येवोत्तरोत्तरदशगुणान्यावरणानि । २८ १९

अस्य स्थूलं तु पञ्चकृत्यावरणं व्यापकमेव। तदेवं स्थिते पृथिव्यावरणेनेदं प्रकारः कथ्यते॥ ततो विश्वो ब्रह्मेति पद्यलिंगादेहे
न पृथिव्यात्मतां प्राप्येत्यर्थः॥ एवमुत्तरत्रापि द्रष्टव्यं निर्णयः। कथं यास्यामीति शंकाऽस्त्यतः। तेनात्मना पृथिवीरूपे
णातन्निरंतराभ्यासः प्रतिपद्युक्त्वरतत्वरामकुर्वेन तत्तदात्मत्वेन क्लेददाहादिरूपं कामावाप्य ध्येयं स्तोगान तुंडान इत्य
र्थः॥ एवं व्याप्तिर्भयः सतत्काले रोगावसाने ब्रह्मतत्त्वात्मनो लिंगं परमात्ममूर्त्तिश्चैतोपासने स्थूलं यद्वा वेदात्मना तत्स
र्वमापकमिति॥ २८॥ इंद्रियाणां तत्सूक्ष्माणां मतिक्रमप्रकारमाह॥ घ्राणेनाधिष्ठितेन गंधमुपेत्य पश्यसन स्पर्शेन

घ्राणेन गंधं रसनेन वै रसं रूपं तु दृष्ट्या श्वसनं त्वचैव॥ श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति
योगी॥ २९॥ स भूतसूक्ष्मेंद्रियसन्निकर्षं मनोमयं देवमयं विकार्यं॥ संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं
गुणसंनिरोधं॥ ३०॥

नभोगुणत्वं शब्दात्मतां प्राणेन तत्त्वकर्मेंद्रियेण आकूतिं तत्क्रियां॥ २९॥ तदेवं स्थूलसूक्ष्म
भूतातिक्रममुक्त्वा तदावरणभूताहंकारप्राप्त्या महदादिप्राप्तिमाह॥ स योगी विकार्यं संसाद्य विज्ञानतत्त्वं याति
विविधं कार्यं यस्येति विकार्योऽहंकारः॥ स त्रिविधः तामसो राजसः सात्त्विक इति॥ तत्र तामसाद्भूतानि तत्सूक्ष्माणि
जायंते राजसाद्धि मुख्यानींद्रियाणि॥ सात्त्विकान्मनः पृष्ठे यद्देवाश्च तेषां लयश्च तत्तदहंकारे तत्र भूतसू
क्ष्माणीं इंद्रियाणां च सन्निकर्षं लयस्थानं॥ तामसं राजसं च मनोमयं देवमयं च सात्त्विकं प्राप्य गत्या एवं गमनेन
तेनाहंकारेण सह विज्ञानतत्त्वं याति॥ ततः गुणानां सन्निरोधो लयो यस्मिन् तत् प्रधानं याति॥ ३०॥

भा० द्वि०
१०

तेनात्मनाऽप्रधानरूपेणानन्दमयः ॥ स च उपाधीनामवसाने शान्तं तमविकृतमानंदं परमात्मानमुपैतीति । नवि षक्तेना
वर्त्तत इत्यर्थः ॥ ३१ ॥ सृती मार्गौ प्रकारावित्यर्थः हे नृप अनयोः निर्दिष्टमसीदन्यस्तु डेत परंगत इति मार्गसद्योमुक्तिः ॥ ए
कासृतिः ॥ यदि प्रयास्यन्नित्यादिना क्रममुक्तिश्च द्वितीया सृतिः ॥ एते सृती वेदे न गीते उक्ते ॥ ननु स्वोत्थे हृते तत्र यदा सर्वे
प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते इति सद्योमुक्तिः ॥ तेऽर्चिरभिसंभवन्तीत्या

तेनात्मनात्मानमुपैति शान्तमानंदमानंदमयोऽवसाने ॥ एतां गतीं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेंग
॥ ३१ ॥ एते सृती ते नृप वेदगीते त्वयाभिपृष्टेषु सनातने च ॥ ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान्
वासुदेवः ॥ ३२ ॥ न ह्यतोऽन्यः शिवः पंथा विसतः संसृताविह ॥ वासुदेवे भगवति भक्तियोगो यतो भवेत ॥ ३३ ॥

दिना क्रममुक्तिश्च वेदेनोक्ता ॥ यत्रानकर्मसिस्तां गतिमाप्नुवंतीति ॥ दक्षिणमार्गस्यापि सम्बन्धित्वादेते सृती इति तद्व
चनं ॥ त्वयाभिपृष्टे यच्छ्रोतव्यमित्यादिप्रश्नेनार्थान्मुक्तिविषये ह्यभिपृष्टे ब्रूहि यद्वा विपर्ययमिति च दक्षिण
मार्गोऽप्यर्थात्पृष्टः । एवं त्वया च ये पृष्टे एते सृती इत्यन्वयः ॥ ३२ ॥ संसृति संसरतः पुंसो बहवो मोक्षमार्गाः । तपोयोगाद
यः ॥ समीचीनस्त्वयमेवेत्याह । न हीति ॥ यतो नु स्थितात् भक्तियोगो भवेत ॥ अतोऽन्यः । शिवः सुखरूपो निर्विघ्नश्च पं १०
था नास्त्येव ॥ ३३ ॥

कुत एतदत आह॥ भगवान्‌ ब्रह्माऽब्रह्मकूटस्थः॥ निर्विकारः॥ एकाग्रचित्तः॥ सन्नित्यर्थः॥ त्रिरीक्षित्वा भगवान्‌ कार्त्स्न्येन साकल्येन ब्रह्मवेदं अन्वीक्ष्य विचार्य्य॥ यत आत्मनि हरौ रतिर्भवेत्‌ तदेव मनीषया अध्यवस्यत निश्चितवान्‌॥ ३४॥ नन्वनुभूते ऽर्थे रतिर्भवति अननुभूते तु भगवति कथं रतिः स्यात्‌ तत्राह॥ भगवान्‌ लक्षितः॥ द्रष्टः कथं स्वात्मनाहं त्र ज्ञात इत्यपेक्षायामितयावैदृश्यैर्बुद्ध्यादिभिः॥ तदेव द्रष्टा दृश्यं याति॥ दृश्यानां घटादीनां दर्शनं स्वप्रकाशाद्दृष्टारं वि

भगवान्‌ ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया॥ तदध्यवस्यत्‌ कूटस्थो रतिरात्मन्‌ यतो भवेत्‌॥ ३४॥
भगवान्‌ सर्वभूतेषु लक्षितः स्वात्मना हरिः॥ दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः॥ ३५॥
तस्मात्सर्वात्मना राजन्‌ हरिः सर्वत्र सर्वदा॥ श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यो भगवान्‌ नृणां॥ ३६॥ पिबंति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतं॥ पुनंति ते विषयविदूषिताशयं व्रजंति तच्चरणसरोरुहांतिकं॥ ३७॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे द्वितीयोऽध्यायः॥ २॥

नानुघटत इत्यनुपपत्तिमुखेन लक्षणैः स्वप्रकाशांतर्यामिलक्षकैः॥ तथा बुद्ध्यादीति कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति॥ व्याप्तिमुखेनानुमापकैः॥ स्वतंत्रश्च कर्त्ता त्वेवमीश्वरः सिद्धः॥ ३५॥ यच्छ्रोतव्यमित्यादि प्रश्नोत्तरमुपसंहरति॥ तस्मादिति॥ श्रवणादिफलमभिनयेनाह पिबंतीति॥ सतां आत्मनः॥ आत्मत्वेनानुप्रकाशमानस्य कथैवामृतं विषयैर्विदूषितं मलिनीकृतं आशयं पुनंति शोधयंति तस्य श्रीविष्णोः॥ चरणपद्मांतिकं श्रीवि

स्का०द्वि० तृतीयेविष्णुभक्तेस्तुवैशिष्ट्यंश्च एवतोमुनेः सत्सुईकेनतत्कर्मश्रवणादरईर्यते॥१॥ इदानीमन्यदेवतासडन
११ स्यापिपुत्रादिसडनवदेवतुच्छफलत्वेनहेयत्वंवक्तुंपूर्वोक्तमनुवदति। एवमिति। ममेतिमां कदाचिद्दैवयोगेन
मनुष्यत्वंप्राप्तेषुतेषुयेमनीषिणस्तेमांतज्ज्ञापियेम्रियमाणाः। तेषां विशेषतएवममेतद्धरिकथाश्रव
णादिकंनिगदितंविहितमित्यर्थः कामफलप्राप्त्यर्थं ममसर्वदेवतानांसडनमाह॥ ब्रह्मवर्चसकाममित्यष्टभिः

श्रीशुकउवाच॥ एवमेतन्निगदितंपृष्टवान्यद्भवान्मम॥ नृणांयन्म्रियमाणानांमनुष्येषुमनीषिणां
॥१॥ ब्रह्मवर्चसकामस्तुयजेतब्रह्मणस्पतिं॥ इंद्रमिंद्रियकामस्तुप्रजाकामःप्रजापतीन्॥२॥ देवीमा
ज यांतुश्रीकामः॥ तेजस्कामोविभावसुं॥ वसुकामोवसून्रुद्रान्वीर्यकामोर्थवीर्यवान्॥३॥ अन्नादिकाम
स्त्वदितिंस्वर्गकामोदितेःसुतान्॥ विश्वान्देवान्राज्यकामःसाध्यान्संसाधकोविशां॥४॥ आयुःकामो
श्विनौदेवौपुष्टिकामइलांयजेत॥ प्रतिष्ठाकामपुरुषोरोदसीलोकमातरौ॥५॥ रूपाभिकामोगंधर्वान्
स्त्रीकामोप्सरउर्वशीं॥ आधिपत्यकामःसर्वेषांयजेतपरमेष्ठिनं॥६॥ ब्रह्मणस्पतिं॥ बृहस्पतिं ब्राह्मणपं इंद्रिय
पाटवकामस्त्विंद्रंप्रजापतीन्दक्षादीन्॥२॥ मायांदुर्गांविभावसुं। अग्निंवसुकामःधनार्थीवीर्यप्रभावःतत्कामोवी
र्यवान्सन्रुद्रान्यजेत॥ अन्नाद्यंनोऽद्यनंतद्यादिकमत्यवहार्यंअदितेःसुतान्द्वादशादित्यान्विशांदेशस्थप्रजानां
साधीनंतामिच्छन्साध्यान्यजेत॥ इलांपृथ्वींप्रतिष्ठास्थानादप्रच्युतिः रोदसीद्यावाभूमी॥५॥ अप्सरास्त्वासोउर्वशी ११
वता॥६॥

यज्ञं यज्ञोपाधिं विष्णुं कोशो वसु संचयः वसुकाम इति । अत्र धनमन्नमिति भेदः । दांपत्यं दंपत्यो अन्योन्यं प्रीतिः । त
देवार्थो यस्य सः । उमां पार्वतीं ॥७॥ धर्मार्थः धर्मकामः उत्तमश्लोको पाधिं विष्णुं ॥ तंतुं तन्वन् संतानवृद्धिमन्वि
च्छन् रक्षा बाधानिवृत्तिः ॥ तत्कामः पुण्यजनान् यक्षान् ॥ ओजो बलं तत्कामः मरुद्गणान् देवान् ॥८॥ राज्यं राष्ट्रं
तत्कामो मनून् देवान् । मन्वंतरपालान् चतुर्दश । राज्ञः कर्म्म राज्यं तत्कामो विश्वेदेवान् देवानिति विशेषः । अ[illegible]चारं

यज्ञं यजेद्यशःकामः कोशकामः प्रचेतसं ॥ विद्याकामस्तु गिरिशं दांपत्यार्थमुमां सतीं ॥७॥ धर्मार्थ उ
त्तमश्लोकं तंतुं तन्वन् पितॄन् यजेत् ॥ रक्षाकामः पुण्यजनान् ओजस्कामो मरुद्गणान् ॥८॥ राज्यकामो म
नून् देवान् निर्ऋतिं त्वभिचरन् यजेत् ॥ कामकामो यजेत्सोमम् अकामः पुरुषं परं ॥९॥ अकामः सर्वकामो वा
मोक्षकाम उदारधीः ॥ तीव्रेण भक्तियोगेन यजेत पुरुषं परं ॥१०॥ एतावानेव यजतामिह निःश्रेयसोदयः
भगवत्यचलो भावो यद्भागवतसंगतः ॥११॥

चरन् शत्रुमरणमिच्छन् निर्ऋतिं राक्षसं कामकामः भोगेच्छुः । अका
म वैराग्यकामः पुरुषं परं प्रकृतिव्यतिरेकोपाधिमीश्वरं ॥१०॥ अकामः एकांतभक्तः उक्तानुक्तः । सर्वकामो वा पुरुष
पूर्णं निरुपाधिं ॥२१॥ सर्वोक्तनानादेवतायजनस्यापि संयोगपृथक्त्वेन भक्तियोगफलत्वमाह ॥ एतावानिति
इहादीन् । अपि यजतां अर्हतद्यजने भागवतानां संगतो भगवत्यचलो भावो भक्तिर्भवति ॥ इति यत एतावानेव निःश्रे
यसस्य परमपुरुषार्थस्योद[illegible] । लान अन्यत्तु सर्वं तुच्छमित्यर्थः ॥१२॥

भा०द्वि०
१२२

भागवतंसंगतस्तस्यनेनसूचितां हरिकथारतिं स्तौति ज्ञानमितिपत ॥ यासु कथासु ज्ञानंभवति कीदृशं आसर्वतः प्रति
निवृतंगुणोर्मीणांरागादीनांचक्रंसमूहोयस्मात ॥ उतानंतरं । तद्धेतुरात्मप्रसादश्चयत्रयासुमनः । प्रसादहेतुः
गुणेषु विषयेषु असंगो वैराग्यंचउतयत्रेतिपाठे ॥ इहामुत्रगुणेष्वसंगः कैवल्यमित्येवसंमतः । पंथा योभक्तियोगः सच
निर्वृतः । श्रवणसुखेन अत्यन्तानिर्वृतस्तद्वितिवा ॥ तासु हरिकथासु कोरतिंनकुर्यात ॥ १२ ॥ अतिव्याहृतंउक्तंऋषिंपर
मत्वाद्यदर्शिनं ॥ कविंदेहद्वंनिष्णातं ॥ १३ ॥ श्रवणेच्छायांहेतुः उत्तरफलयासुताः कथाः । सतांभागवतांनांसदसि

ज्ञानंयदाप्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसादउतयत्रगुणेष्वसंगः ॥ कैवल्यसंमतपथस्त्वथभक्ति
योगः कोनिर्वृतोहरिकथासुरतिंनकुर्यात ॥ १२ ॥ शौनक उवाच ॥ इत्यभिव्याहृतंराजानिशम्यभरतर्ष
भः ॥ किमन्यत्पृष्टवानभूयोवैयासकिमृषिंकविं ॥ १३ ॥ एतच्छुश्रूषतांविद्वन्सूतनोर्हसिभाषि
तुं ॥ कथाहरिकथोदर्काः सतांस्युःसदसिध्रुवं ॥ १४ ॥ सवैभागवतोराजापांडवेयोमहारथः ॥ बाल
क्रीडनकैः क्रीडन्कृष्णक्रीडांयआददे ॥ १५ ॥ वैयासकिश्चभगवान्वासुदेवपरायणः ॥ उरुगाय
गुणोदाराः सतांस्युर्हिसमागमे ॥ १६ ॥ आयुर्हरतिवैपुंसामुद्यन्नस्तंचयन्नसौ ॥ तस्यर्तेयत्क्षणोनीत
उत्तमश्लोकवार्तया ॥ १७ ॥

सभायांस्युः ॥ १४ ॥ एतत्प्रपंचयतिद्वाभ्यां ॥ कृष्णप्रज्ञादि कृष्णरूपांक्रीडांयः स्वीकृत
वान ॥ १५ ॥ उरुगायस्यगुणैरुदारामहत्यः कथाः स्युः ॥ १६ ॥ किंचर्थेवर्ण्यमाणमाह हरिकथयासुफलंकुर्वित्याश
येनाह । आयुरितिद्वाभ्यां । असौसूर्यः उद्यन्उदयन्अस्तमदर्शनंचयततेनक्षणोनीतः तस्यआयुः ऋतेवर्जयित्वा १२२
वृथैवहरति ॥ १७ ॥

कु

ननु जीवन्नमेवैतेषां मायुषः ॥ फलमस्ति तत्राह ॥ ननु तेषां रवासो नास्ति ॥ तर्हि नस्त्रवास्थ मर्मकोत्राः । उतापि ननु तासामाहारा
दिकं नास्ति तत्राह ॥ न खादंति ना ह्नति । न मेहंति रेतः । सकं मैथुनं तत् इति किं तराकारं पशुत्वमाह ॥ अपर इति ॥ १८ तदेवाह स्वादि
भिः संस्तुतः सहृज्ञो निरूपितः । यस्य कर्णपथं कदाचिदपि नागतः । सः अबुद्धास्यदत्वात् पशुभिः कदमल विषयासक्तत्वादि
दु ताहे ग्रा मश्ककरैः कंटकवत् दुःखद विषयासक्तत्वात् खरैस्तुल्य इत्यर्थः । १९ तस्यांगानि च निःफलानीत्याह । विले बतो

तरवो किं न जीवंति भस्त्राः किं न श्वसंति च । न खादंति न मेहंति किं ग्राम पशवो परे ॥ १८ ॥ श्वविड्वराहोष्ट्र[redacted]
खरैः संस्तुतः पुरुषः पशुः ॥ न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥ १९ ॥ बिले बतोरुक्रमविक्रमान्ये न शृ
एवतः कर्णपुटे नरस्य । जिह्वासती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः । २० भारः परं पट्टकिरीटजु
ष्टं अप्युत्तमांगं न नमेन्मुकुंदं । शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्कांचनकंकणौ वा । २१ । बर्हायते ते नय
ने नराणां लिंगानि विष्णोर्न निरीक्षतो ये ॥ पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ॥ २
२ जीवन्शवो भागवतांघ्रिरेणुं न जातु मर्त्योभिलभेत यस्तु ॥ श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसन्शवो
यस्तु न वेद गंधं ॥ २३ ॥

ति पंचभिः ॥ तवेति रवेदे नश्र एव तो नरस्य ये कर्णपुटे ते बिले । वृथारं ध्रे न चेदुपगायति तस्य जिह्वा अ
सती दुष्टा दार्दुरी भेकस्तदीया जिह्वेव । २० पट्टवस्त्रोष्णीषेण किरीटेन च जुष्टमपि शिरो यदि न तर्हि केवलं भार एव शावो मृतकः
तत्करतुल्यौ लसती कांचनकंकणौ ययोस्तौ ॥ बर्हायते वा आरः । ये नयने विष्णोर्मूर्तीर्न निरीक्षेते ते बर्हायते मयूरपिच्छनेत्रतुल्ये ॥
द्रुमवज्जन्म नजात इति ॥ तथा वृक्षमूलतुल्यावित्यर्थः । २२ नाभिलभेत अनितो न स्पृष्ट्रोत श्रीविष्णुपद्याः श्रीविष्णुपदलग्ना

भा० द्वि०
२३

अथ मवसारं वलं काठिन्यं यस्य विक्रियालक्षणमाह । अथेति ।२४। गात्ररुहेषु रोमसु हर्षः उद्गमः ।२४। यस्मादत्र तस्य सर्व्वे
मेतद्धार्य्यं अङ्गहे सूत मनसोनुकूलं च प्रियं च ब्रूषे । अथ अतः साधु पृष्ट सन् वैयासकिर्न्नृपतिं प्रति यदाह । तद् विधेहि इति
२५ इति द्वितीये तृतीयः ॥३॥ चतुर्थे परीक्षिता पृष्टं सृष्ट्यादि हरिचेष्टितं । शुकेन ब्रह्मनारदसंवादेनोपवर्ण्यते । ४ । रा
ज्ञः प्रश्नं कथयितुं तस्य प्राकृतनी स्थितिमाह । वैयासके रिति चतुर्भिः वैयासकेः शुकस्य इति । एवं सूतं आत्मनस्तत्व

तदश्मसारं हृदयं तेव्रइयं यद्गृह्यमाणैर्हरिनामधेयैः । न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः
।२४। श्रुत्वाभिधेयं मनसोनुकूलं प्रभाषसे भागवतप्रधानः । यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधु
पृष्टः ।२४। इति द्वितीयस्कंधे महापुराणे नाम तृतीयोध्यायः ॥ ३ ॥ सूत उवाच ॥ वैयासके
रिति वचस्तत्वनिश्चयमात्मनः ॥ उपधार्य्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ॥ १ ॥ आत्मजायासुतागारपशुद्रवि
णबन्धुषु राज्येषु विकले नित्यं निरूढां ममतां जहौ ॥ २ ॥ पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः कृष्णानुभावश्र
वणे श्रद्दधानो महामनाः ॥ ३ ॥ संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत् ॥ वासुदेवे भगवति आत्मभावं दृढं गतः ॥
॥ ४ ॥ राजोवाच ॥ समीचीनं वचो ब्रह्मन् सर्व्वज्ञस्य तवानघ । तमो विशीर्य्यते मह्यं हरेः कथयतः कथां ॥ ५ ॥ भूय एव विवि
त्सामि भगवानात्ममायया । यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ॥ ६ ॥ त्यसत्ती
स्य निश्चयो यस्मात तद्वचः उपधार्य्य आक
र्ण्य तु एवं सेव्युः नान्यत्स्यैवं कृतां १ आत्मा देहः पशवो गजादयः २ इममेवार्थं हरिलीलालक्षणं ३ संस्थां मृत्युं त्रैवर्गिकं धर्मा
र्थकामप्रधानं संन्यस्य त्यक्त्वा आत्मभावं परमप्रेम्णा भगवदात्मत्वं गतः । सा च तः सत्तप पृच्छ ४ मह्यं मम मोज्ञानं तद्यपतितव त २३
कथयतः सतः अतः समीचीनं ५ पुनश्च वेदितुमिच्छामि दुर्विभाव्यं वितर्कयितुमशक्यं यथा सृजति ६ ॥

यथा गोपायति | पालयति संयच्छते संहरति पुरुशक्तिः बहुशक्तिमान् क्रीडन् यथा करोति | आत्मानं ब्रह्मादिरूपिणं क्रीडयन् विकरोति वि-
धं करोति ७ || एकः पुरुषरूपेण युगपज्जन्मभिः ब्रह्माद्यवतारैः क्रमशो वा यथा प्रकृतेर्गुणान् गृह्णाति ९ || विचिकित्सितं संदिग्धं |
शाब्दे ब्रह्मणि विचारेण निष्णातः परस्मिन्ननुभवेन १० उपामंत्रितः प्रार्थितः प्रचक्रमे देवतागुरुनमस्कारादिरूपम् [illegible] . प्रक्रांतवानिति

यथा गोपायति विभुः यथा संयच्छते पुनः || यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् || आत्मानं क्रीडयन् क- क्रीडन्
रोति विकरोति च || नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः || दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितं ८ ||
यथा गुणांस्तु प्रकृतेर्युगपत् क्रमशोपि वा || बिभर्ति भूरिशस्त्वेकः कुर्वन् कर्माणि जन्मभिः ९ || विचिकि-
त्सितमेतन्मे ब्रवीतु भगवान् यथा || शाब्दे ब्रह्मणि निष्णातः परस्मिन् भगवान् खलु || १० || सूत उवाच || इ-
त्युपामंत्रितो राज्ञा गुणानुकथने हरेः || हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे || ११ || श्रीशुक उवाच || नमः
परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया || गृहीतशक्तित्रितया [illegible] देहिनां अंतर्भवायानुप-
लक्ष्यवर्त्मने १२ ||

त्वर्थः १२ स देवाहं नमस्यति त्रयोदशभिः | परस्मै सर्वोत्तमाय | तत्र हेतुः भूयसे अपरिमितमहिम्ने इति दर्शयति || सतः प्रपंचस्य उद्भवा-
दिषु निमित्तभूतया लीलया गृहीतं ब्रह्मादिरूपेण रजआदिशक्तित्रितयं येन | तस्मै अंतर्भवाय अंतर्यामिणे || अत एव ||
सर्वांतरत्वादनुपलक्ष्यं वर्त्म यस्य १२ ||

भा०द्वि०
२९

विविधफलदात् तत्त्वमनुस्मरन् प्रणमति॥ भूयः पुनश्च नमः सतां धर्मवर्त्तिनां वृजिनच्छिदे दुःखहंत्रे। असतां अधर्मशीलानां असंभ-
वाय अनुद्भवहेतवे॥ अखिलसत्त्वमूर्त्तये तत्तद्देवादिरूपेण तत्तत्फलदायेत्यर्थः॥ समग्रसत्त्वमूर्त्तये इत्यर्थः। समग्रसत्त्वमू-
र्त्तये गतिर्वा [redacted] पुनरपि पद्मलक्षणो तस्यैव लक्षणमाह॥ पारमहंस्ये प्रत्यक्तिष्ठारूपे आश्रमे व्यवस्थितानां पुंसां अनुमृग्यं
आत्मतत्त्वं निरसनेन पुनः मोक्षपदात्मतत्त्वं तस्य दाशुषे दात्रे॥ १४॥ सात्वतां भक्तानां ऋषभाय पालकाय कुयोगिनां भक्तिहीनानां वि-

भूयो नमः सद्वृजिनच्छिदेऽसतामसंभवायाखिलसत्त्वमूर्त्तये॥ पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानां
मनुमृग्यदाशुषे॥ १४॥ नमो नमस्तेस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनां॥ निरस्तसाम्या-
तिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः॥ १५॥ यत्कीर्त्तनं यत्स्मरणं यदीक्षणं यद्वंदनं यच्छ्रवणं
यदर्हणं॥ लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः॥ १६॥ विचक्षणा यच्चरणोपसा-
दनात् संगं व्युदस्योभयतोंतरात्मनः॥ विंदंति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः॥ १७॥

दूरा काष्ठा गतिर्यस्य दुर्ज्ञेयायेत्यर्थः। तदेव वैषम्यम् अतीतानुपपत्ति निर्दोषबलया चिन्त्यमैश्वर्यमाह। निरस्तं साम्यं अतिशयश्च य-
स्य यद्रूपेण या अन्यसाम्यमतिशयश्च नास्ति तेन राधसा ऐश्वर्येण स्वधाम्नि स्वस्वरूपे ब्रह्मणि रममाणाय॥ १५॥ सर्वं सा-
धनं तत्त्वोन्नत्तेः श्रेष्ठं अनुस्मरन् प्रणमति॥ यत्कीर्त्तनमिति द्वाभ्यां अर्हणं पूजनं सुभद्रं सुमंगलं श्रवो यशो यस्य तस्मै॥
१६ विचक्षणाः विवेकिनः यस्य चरणयोरुपसादनात्। उपसर्गनिरसनात्। अन्तरात्मनो मनसः। उभयत्र इह च परत्र च संगं

२९

क्ति भृत्यानां सर्वसाधनवैफल्यं दर्शयन् नमति ॥ तपस्विन इति । मनस्विनो योगिनः सुमंगलाः सदाचाराः यस्मिन् तदर्पणं विना
सुभद्रं न विंदंति ॥ अस्यावृत्तिर्यशः श्रवणादेः प्राधान्यज्ञापनाय ॥ १८ भक्तेः परमशुद्धिहेतुत्वं दर्शयन्नाह किरातादयो ये पापजा
तयः ॥ अन्ये च ये पापरूपास्ते यदुपाश्रयाः भागवताः । तदाश्रयाः संतः शुध्यंति । आसन्नो ये नान्यं कोऽपि रिहरति । प्रभ विष्णवे नमः
नमस्कारो ये ति ॥ १९ ॥ सर्वोपास्यत्वमनुस्मरन् ॥ प्रार्थयते स इति स एष आत्मवतां धीराणां । आत्मा आत्मत्वेनोपास्य इत्यर्थः

तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः । क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्र
वसे नमो नमः ॥ १८ ॥ किरातहूणांध्रपुलिंदपुल्कसा आभीरकंका यवनाः खसादयः ॥ ये [illegible] च पापा यदुपा
श्रयाः शुध्यंति तस्मै प्रभविष्णवे नमः ॥ १९ ॥ स एष आत्मात्मवतामधीश्वरः ॥ त्रयीमयो धर्ममयस्तपोम
यः ॥ गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगो भगवान्प्रसीदतां ॥ २० ॥ श्रियः पतिर्यज्ञपतिः प्रजापति
र्धियांपतिर्लोकपतिर्धरापतिः ॥ पतिर्गतिश्चांधकवृष्णिसात्वतां प्रसीदतां मे भगवान्सतांपतिः ॥ २१ ॥
यदंघ्र्यनु [illegible] ध्यानसमाधिधौतया धियानुपश्यंति हि तत्त्वमात्मनः । वदंति चैतत्कवयो यथारुचं स मे मुकुं
दो भगवान्प्रसीदतां ॥ २२ ॥
त्रयीमयत्वादि त्रिभिः पदैः । तत्तन्मार्गेणोपास्यत्वं विवक्षितं ॥ गतव्यलीकैर्निष्कपटैर्वितर्क्यं
अत्याश्चर्यमेवावाद्गणीयं लिंगं मूर्त्तिर्यस्य स प्रसीदतु ॥ २० ॥ सर्वपालकत्व [illegible] मनुस्मरन्नाह श्रिय इति ॥ गतिश्च सर्वोपलुप्तरक्षकः ।
॥ २१ ॥ ज्ञानप्रदत्वमनुस्मरन्नाह यस्यांघ्र्यं यस्यांघ्रेरनुध्यानमेव समाधिः । तेन धौतया शोधितया यथारुचिं रुच्यनुसारेण सगुण

निर्गुणो हि स्वदेहे: यद्वा रुक्मप्रतिमायथा मतीत्यर्थः ॥ २२ ॥

किंचपुराकल्पे। अजस्यहृदिसृष्टिविषयांस्मृतिंवितन्वतायेनप्रचोदितासरस्वतीतस्यमुखतःकिलप्रादुर्भूतास्वानिलक्षणानि
शिक्षादियुक्तानियस्याःसाऋषीणांज्ञानप्रदातांऋषभःश्रेष्ठः॥२३॥इदानींस्ववाचंश्रोतृजनाह्लादिनींशृंगारकरुणादिभिःप्रार्थय
ते।भूतैरितिसमेवचांसिअलंकृषीष्टअलंकरोतु।अन्यस्यवचसामन्येनालंकारासंभवमाशंक्यतासांतदधीनतामाविष्करोतियो
महद्भिर्भूतैरिमाःपुरःशरीराणिसृष्ट्वाअमुषुपर्शेतर्यामि।तयाशेतेवसतीति॥अपुरुषसंज्ञांप्रमाणयति।यद्यस्मात्पुरु
३

प्रचोदितायेनपुरासरस्वतीवितन्वताऽजस्यसतींस्मृतिंहृदि॥स्वलक्षणाप्रादुरभूत्किलास्यतःसमेऋषीणा
मृषभःप्रसीदतां।२२।भूतैर्महद्भिर्यइमाःपुरोविभुर्निर्मायशेतेयदमूषुपूरुषः॥भुंक्तेगुणान्षोडशषो
डशात्मकःसोलंकृषीष्टभगवान्वचांसिमे॥२४॥नमस्तस्मैभगवतेव्यासायामिततेजसे॥पपुर्ज्ञानमयंसौ
म्यायन्मुखांबुरुहासवं।२५॥एतदेवात्मभूराजन्नारदायविपृच्छते॥वेदगर्भोभ्यधात्साक्षाद्यदाहह
रिरात्मनः२६॥इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधेचतुर्थोध्यायः॥४॥

षइति॥अतएवयः एकादशेंद्रियपंचभूतरूपान्षोडशगुणान्कलाःभुंक्तेप्रकाशयतिपालयतीति॥तदात्मनेपदमार्षं॥
अत्रहेतुः।यतःषोडशानामात्मावेतपितास्वयमेकः।नत्वजडीवल्लभुच्यतेप्रार्थनाविरोधात्।२४॥श्रीव्यासंनमस्करोति॥नम
इतिसौम्यानत्तायस्यमुखांबुरुहेआसवोमकरंदतं।२५।इदानींअभ्योत्तरतयाब्रह्मनारदसंवादंप्रस्तौतिएतदिति।उ
त्पत्तिसमयएववेदागर्भेयस्य॥साक्षाद्धरिर्यदाह।२६॥इतिश्रीभागवतेततीयस्कंधेचतुर्थोध्यायः॥४॥ २५

पंचमे नारदेनाथ पृष्टः स्रष्ट्रादिवस्तुचः हरेर्लीलां विराट् सृष्टिं कालकर्मादिशक्तिभिः ॥१॥ नारदाय विधिः पृष्टे तेवेद गर्भोस्य धादि
त्युक्तं ॥ तत्र नारदः प्रश्नमाह ॥ देवदेवेति ॥ हे भूतभावन ॥ अत एव सर्वेषां पूर्वज ॥ अनादि ज्ञायते नेनेति ज्ञानं तत्साधनं यत्तद्विजा
नीहि विशेषेण ज्ञापयेत्यर्थः ॥ कथंभूतं आत्मतत्वं नितरां दर्शयति येन तत् ॥१॥ उपलक्षणानि तत्त्वं विश्वमेवात्मज्ञानसाधनं अत
स्तद्विशेषं पृच्छति ॥ यद्रूपं येन रूप्यते प्रकाश्यते ॥ यदधिष्ठानं यदाश्रयं यतः येन सृष्टं ॥ तत्संस्थं यस्मिन् लीयते यत्परं ॥
यदधीनं यच्चेति यदात्मकं स्वतः सत्कारणतो वेत्यर्थः तस्य तत्वं यथार्थं तत्वतो वद ॥ ननु जानीमह इति न वक्तव्यमित्याह ॥ स

श्रीनारद उवाच ॥ देवदेव नमस्तेस्तु भूतभावन पूर्वज ॥ तद्विजानीहि यज्ज्ञानमात्मतत्वनिदर्शनं ॥१॥ यद्रू
पं यदधिष्ठानं यतः सृष्टमिदं प्रभो ॥ यत्संस्थं यत्परं यच्च तत्तत्वं वद तत्वतः ॥२॥ सर्वं ह्येतद्भवान्वेद भू
तभव्यभवत्प्रभुः ॥ करामलकवद्विश्वं विज्ञानावसितं तव ॥३॥ यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकं
एकः सृजसि भूतानि भूतैरेवात्ममायया ॥४॥ आत्मन् भावयसे तानि न पराभावयन् स्वयं आत्मश
क्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ॥५॥
र्वमिति भूतं जातं भव्यं भविष्यमाणं भवत् जायमानं तेषां प्रभुः य
तः अतः विशिष्टेन ज्ञानेनावसितं निश्चितं ॥३॥ आस्तामिदं आदौ तावत्त्वामेव कथयेत्याह ॥ यतो विज्ञानं यस्य कस्त
२ व विज्ञानं इत्यर्थः ॥ यदाधारः कस्तवाश्रयः यत्परः यदधीनः यदात्मकः यत्स्वरूपः मम त्वमेव स्वतंत्रः ॥ परमे
श्वर इति बुद्धिः ॥ तव तपश्चरणेन तु परशंका पापृच्छामीत्याह सार्द्धेश्चतुर्भिः ॥ एकोऽसहायः ॥४॥ आत्मनि मा
वयसे पालयसि ॥ त्वमेव पराभवमप्राप्नुवन् अक्लमः श्रमरहितः ॥ यथोर्णनाभिरात्मन एव शक्तिमवष्टभ्य सृजत

ना०टि०
२६

तस्मात् अहं तु अस्मिन् विश्वस्मिन् परं उत्तमं॥ अपरं अधमं। समं मध्यमं वा॥ तत्रापि नाम मनुष्यादि रूपं द्विपदत्वादि गुणाः
शुक्लत्वादि तैर्भाव्यं साध्यं॥ तत्रापि सदसत् स्थूलं सूक्ष्मं च किंचिद् अन्यतो न वेद॥ किंतु त्वत्त एव सर्वं भवतीति मन्ये ॥६॥ मन्यथाविधो
पि भवान् तपोचरद् इति यत्॥ तत्तस्मात् खेदयसे मोहयसि। यतः पराशंकां ईश्वरांतरशंकां प्रयच्छसि ॥७॥ यथैवाहं त्वयानुशासि
तः शिक्षितः। सन् बुद्ध्ये। बुध्येयं। तथा विशेषेण विज्ञापय ॥८॥ प्रश्नमभिनंदति हे वत्स पुत्र तवेदं विचिकित्सितं॥ संदेह तत्पूर्वकः॥ यद्

नाहं वेद परं ह्यस्मिन् नापरं न समं विभो॥ नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः॥६॥ स भवानचरद्घोरं यत्तपः
सुसमाहितः॥ तेन खेदयसे नस्त्वं पराशंकां प्रयच्छसि॥७॥ एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर॥ विजानी
हि यथैवेदमहं बुध्येनुशासितः॥८॥ ब्रह्मोवाच॥ सम्यक्कारुणिकस्येदं वत्स ते विचिकित्सितं॥ यदहं चोदितः सौ
म्य भगवद्वीर्यदर्शने॥९॥ नानृतं तव तच्चापि यथा मां प्रब्रवीषि भो॥ अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे॥१०॥

तत्र हेतुः यतः॥८॥ परमधर्मं भगवद्वीर्यप्रकाशने प्रवर्तितोस्मि अतस्त्वं जिज्ञासुरपि मयि कृपामेव कृतवानित्यर्थः॥९॥ ननु
त्वमेव भगवानित्युक्तं तत्र यथा एकमसि इति सत्यानित्यादिना सत्यं। यथा मामीश्वरत्वेन प्रब्रवीषि तदपि कृतावरणे। नात्यंतमनृतं य ते
२ तः कारणात्। एतावत् प्रभावस्य भावः॥ एतावत्त्वं मे अस्ति। किंतु मत्तः। परमीश्वरमविविज्ञाय ज्ञेये॥ अतः सोहं ख्याततत्वे यं
भ्रांतिः॥ ननु बुद्धि एवं मन तमित्यर्थः॥ यत ईश्वरात् मम एतावत्त्वं तमविज्ञायेति चान्वयः॥१०॥

परमे ते

२६

तर्हि कोसावीश्वर इत्यपेक्षायां तस्मै नमः ॥ कुर्वन्नेव तं कथयति त्रिभिः ॥ येन स्वप्रकाशेन रोचितं प्रकाशितमेव प्रकाशयामि स्र
ष्टा निव्यक्तिकरोमि ॥ यथार्कादयश्चैतन्यप्रकाशमेव प्रकाशयंति ॥ तथा च श्रुतिः ॥ न तत्र सूर्यो भाति न चंद्रतारकं नेमा वि
द्युतो भांति ॥ कुतोयमग्निः ॥ तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति ॥ तस्मै नमो धीमहि ॥ यस्य मायया
मोहिताः संतो युष्मदादयो मां जगद्गुरुं ॥ जगत्कर्तारं वदंति तस्मै ॥ १२ यन्माययेति ॥ संबंधोक्तेस्तस्या दुर्जयत्वोक्तेश्च

येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहं ॥ यथार्कोग्निर्यथा सोमो यथार्क्षग्रहतारकाः ॥ ११ ॥ तस्मै नमो भगव
ते वासुदेवाय धीमहि यन्मायया दुर्जयया मां ब्रुवंति जगद्गुरुं ॥ १२ ॥ विलज्जमानया यस्य स्थातुमीक्षापथे
मुया ॥ विमोहिता विकत्थंते ममाहमिति दुर्धियः ॥ १३ ॥ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ॥ वासुदे
वात्परो ब्रह्मन् न चान्योर्थोस्ति तत्वतः ॥ १४ ॥

तस्या विधिकमस्ति संसारः ॥ तेत्याह ॥ मत्कपटमसौ जानातीति यस्य दृष्टिपथे स्थातुं विलज्जमानैव तस्मिन्न स्वकार्य्यं
या मकुर्वत्यामुया मायया विमोहिता विकत्थंते ममाहमिति दुर्धियः ॥ अविद्यावृतज्ञाना एव केवलं विकत्थंते श्लाघंते ॥ अनेन
यदुपमित्यस्य प्रश्नोत्तरं भवति ॥ १३ ॥ तदेवं स्वस्मादुत्पत्त्यं परमेश्वरं निरूप्येदानीं यदधिष्ठानमित्यादि नवप्रश्नानां स एवाधिष्ठानं
सर्वमित्युत्तरं वक्तुं तद्व्यतिरेकेणान्यस्यासत्यमाह ॥ द्रव्यमिति ॥ द्रव्यं महाभूतानि उपादानानि रूपाणि ॥ कर्म जन्मनिमित्तं का
लस्तु क्षोभकः ॥ स्वभावः स्तत्परिणामहेतुर्जीवो भोक्ता वासुदेवात्परो न्योर्थो नास्ति कारणव्यतिरेकात्कार्यस्य सत्ताभावात् ॥ १४ ॥
स्ति

तत्प्रपंचयति द्वाभ्यां ॥ नारायणपरः कारणं येषां ते ॥ अनेनैव शास्त्रयोनित्वप्रतिपादनेनेश्वरे प्रमाणं सर्वज्ञत्वादिकं चोक्तं देवा-
श्च तदंगाज्जाताः ॥ अतो न तद्व्यतिरिक्ता लोकाः ॥ स्वर्गादयस्तदानंदांशाः मखास्तत्साधनभूताः ॥२५॥ योगः प्राणायामादिः । तप-
स्तत्साध्यं चित्तैकाग्र्यं ज्ञानं तत्साध्यं गतिस्तत्फलं ॥ अनेनैव सर्वं तदधीनमित्युक्तं ॥२६॥ तर्हि त्वं किं करोषीत्यपेक्षायामाह ॥ तस्य-
सृज्यमपि तेन सृष्टोहं सृजामि ॥ ईक्षया कटाक्षेण । तत्र हेतवः द्रष्टुरित्यादयः ॥२७॥ ननु कुतोयं जीवेश्वरविभागः यतः स्वल्पैश्वर्यः
स च प्रेरकः स्यादित्यपेक्षायां जीवेश्वरविभागहेतुमाह । त्रिभिः । सत्त्वमिति निर्गुणस्यापीश्वरस्यैते त्रयो गुणा बध्नंतीत्युत्तरेण

रा नारायणपरा वेदा देवा नारायणांगजाः ॥ नारायणपरा लोका नारायणपरा मखाः ॥२४॥ नारायणपरो यो-
गो नारायणपरं तपः ॥ नारायणपरं ज्ञानं नारायणपरा गतिः ॥२५॥ तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः ॥
सृज्यं सृजामि सृष्टोहमीक्षयैवाभिचोदितः ॥२६॥ सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः ॥ स्थितिसर्गनि-
रोधेषु गृहीता मायया विभोः ॥२७॥ कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः ॥ बध्नंति नित्यदा मुक्तं मायिनं
पुरुषं गुणाः ॥२८॥ स एष भगवान् लिंगैस्त्रिभिरेभिरधोक्षजः ॥ स्वलक्षितगतिर्ब्रह्मन्सर्वेषां मम चेश्वरः ॥२०॥

त्रयः । कथंभूताः । तेनैव स्वातंत्र्येण स्थित्याद्यर्थं मायया गृहीताः ॥२८॥ वस्तुतः सर्वदा मुक्तमपि मायिनं मायाविषयं पुरुषं जीवं बध्नं-
ति । कार्यमधिभूतं कारणमध्यात्मकं कर्ताधिदैवतं तेषां भावस्तत्त्वं तस्मिन् द्रव्यं महाभूतानि ज्ञानं तत्त्वावेन देवता क्रिया इंद्रिया-
णि तदाश्रयाः । तेषां कारणभूताः । तत्तदभिमानेन बध्नंति ॥२९॥ अतः एवंस्य मायः । एभिर्लिंगैर्गुणैर्जीवानामविवेकरूपाधिभिः स
सुष्ठु अलक्षिता गतिस्तत्त्वं यस्य सः । स्वैर्नेत्रैरेव लक्षिता गतिर्यस्येति वा ॥२०॥ २७

तस्य सृष्टिप्रकारमाह। कालमिति। कर्म्म जीवादृष्टं विबुभूषुः विविधं भवितुमिच्छन्॥२१॥ गुणानां व्यतिकरः क्षोभः साम्यत्यागः
स्वभावतः परिणामो रूपांतरापत्तिः पुरुषः ईश्वरस्तेनाधिष्ठितादिति त्रयाणां विशेषणं महत्तत्वस्य॥२२॥ विकुर्वाणात् वि
क्रियमाणात् तस्य च क्रियाज्ञानशक्तित्वात् त्रिगुणत्वेपि रजः सत्वाभ्यामुपबृंहितत्वं अहंकारस्यावरत्वात्तमःप्रधान
त्वं। अत एवाहंकारकार्येषु तामसमाकाशादिकं। बहु राजसं सात्विकं चाल्पं। एवं तदुपाधिकेषु जीवेष्वपि तथैव तामसा

कालं कर्म्म स्वभावं च मायेशो मायया स्वया॥ आत्मन् यदृच्छया प्राप्तं विबुभूषुरुपाददे॥२१॥ कालाद्गुण
व्यतिकरः परिणामः स्वभावतः। कर्म्मणो जन्म महतः पुरुषाधिष्ठितादभूत्॥२२॥ महतस्तु विकुर्वाणाद्रजः
सत्वोपबृंहितात्॥ तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः॥२३॥ सोहंकार इति प्रोक्तो विकुर्वन्समभूत्त्रिधा
वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा॥२४॥ द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो॥ तामसाद
पि भूतादेर्विकुर्वाणादभून्नभः॥२५॥ तस्य मात्रा गुणः शब्दो लिंगं यद्द्रष्टृदृश्ययोः॥२५॥

धिक्यं॥२३॥ स च विकुर्वन् रूपांतरं गच्छन् त्रैविध्यमेवाह। वैकारिकः सात्विकः तैजसो राजसः। यद्भिदा यस्य भेदः। द्रव्य
शक्तिरित्यादीनि प्रातिलोमेन त्रयाणां लक्षणानि॥२४॥ द्रव्ये महाभूताख्ये शक्तिर्यस्य क्रियासु इंद्रियेषु शक्तिर्यस्य ज्ञा
नेषु देवेषु शक्तिर्यस्य हे प्रभो बोधुशक्तभूतादेरिति तामसस्य विशेषणं न तु तामसात्पृथगं शब्दो न भवतीति प्रसिद्धं सत्यं
सत्यं तस्य नभसो मात्रा सूक्ष्मं रूपं गुणश्च व्यावर्त्तको धर्मः। शब्दद्वारा नभ उत्पद्यत इत्यर्थः एवमेव स्पर्शादिष्वपि द्रष्टव्यं
शब्दस्य लक्षणं लिंगमिति। कुड्याद्यंतरितेन विटुच्चैर्गडो गड इत्युक्ते यो गडः द्रष्टापश्चैतेन दृश्यो यश्च तयोर्लिंगं।

सां॰ टि॰ १८

परस्य तमसः कारणत्वेनयश्च शब्दांश्च वायु ॥ तस्यैव लक्षणं प्राणो देहधारणं ओजः सहो बलानि इंद्रियं नेमेः शरीराणां यादवनितेषां हेतुरित्यर्थः ॥ उदपद्यतेत्यन्वयः २६ ॥ स्वतो रूपतेजः वायुतमसोः कारणत्वतयोरन्वयात स्पर्शशब्दवच्च ॥ एवमेव पृथिव्यांश्च परान्वयाधिक्यात् गुणाधिक्यं २७ घोषः शब्दः २८ ॥ विशेषः पृथ्वी ॥ पृथिव्यांश्च परान्वयाधिक्यात् गुणाधिक्यं २९ ॥ मनः शब्देनैव तदधिष्ठाता चंद्रोपि द्रष्टव्यः ॥ अन्येच दश देवाः वैकारिकाः सात्विकाहंकारकार्याः ॥ तानाह दि

नभसोपि विकुर्वाणात् तत्स्पर्शगुणोनिलः ॥ परान्वयाच्छब्दांश्च प्राणओजः सहो बलं ॥ २६ ॥ वायोरपि विकुर्वाणात् कालकर्मस्वभावतः ॥ उदपद्यत तेजोवैरूपवत्स्पर्शशब्दवत् ॥ २७ ॥ तेजसस्तु विकुर्वाणादासीदंभोरसात्मकं ॥ २८ ॥ रूपवत्स्पर्शवच्चांभो घोषवच्चपरान्वयात् ॥ २८ ॥ विशेषस्तु विकुर्वाणादंभसो गंधवानभूत ॥ २९ ॥ परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः ॥ वैकारिकात् मनोजज्ञे देवा वैकारिका दश ॥ दिग्वातार्कप्रचेतोश्विवन्हींद्रोपेंद्रमित्रकाः ॥ ३० ॥ तैजसात्तु विकुर्वाणादिंद्रियाणि दशाभवन् ॥ ज्ञानशक्तिः क्रियाशक्तिः बुद्धिः प्राणस्तु तैजसौ ॥ श्रोत्रंत्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्रांघ्रिपायवः ॥ ३२ ॥

शश्च वातश्च अर्कश्च प्रचेताश्च अश्विनौ च एते पंचश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः ॥ वन्हिश्च इंद्रश्च उपेंद्रश्च मित्रश्च प्रजापतिः ॥ एते पंच वाक्पाणिपादपायूपस्थानामधिष्ठातारः ॥ ३० ॥ यतो ज्ञानशक्तिर्बुद्धिः क्रियाशक्तिः प्राणश्च तैजसाहंकारकार्यौ अतो ज्ञानक्रियाविशेषरूपाणींद्रियाण्यपि तैजसादभवन्नित्यर्थः ॥ तान्याह ॥ श्रोत्रमिति द्वोः पाणि

पा

मनः उभयात्मकं संकल्पविकल्पात्मकः ॥ २९ ॥

गै

१८

एवं कारणसृष्टिमुक्त्वा कार्यसृष्टिमाह ॥ यदेति ॥ एते असंगताः अमिलिता आसन् ॥ अत एव पदा... यतनस्य शरीरस्य निर्मा
णे न शेकुः ॥३३॥ तदा सदसत्त्वं प्रधानगुणभावं उपादाय स्वीकृत्य उभयं समष्टिव्यष्ट्यात्मकं शरीरं ॥३४॥ कालकर्मस्वभावान
धिष्ठाय स्थितः ॥ जीवयतीति जीवः परमात्मा अजीवमचेतनं ॥ अजीवयत् चेतयति स्म ॥३५॥ निर्भिद्य पृथक्कृत्य स्थित इत्यर्थः ॥
॥३६॥ तदवयवैर्लोकरचनामाह ॥ यस्येति ॥ कटिरूरुमूलयोः पश्चाद्भागः जघनं पुरोभागः अधः सप्त लोकान् अतलादीन्

यदैते संगता भावा भूतेंद्रियमनोगुणाः ॥ यदायतननिर्माणे न शेकुर्ब्रह्मवित्तमा ॥३३॥ यदा संहत्य चान्योन्यं
भगवच्छक्तिचोदिताः ॥ सदसत्वमुपादाय चोभयं ससृजुर्ह्यदः ॥३४॥ वर्षपूगसहस्रांते तदंडमुदकेशयं ॥ काल
कर्म्मस्वभावस्थो जीवोऽजीवमजीवयत् ॥३५॥ स एव पुरुषस्तस्मादंडं निर्भिद्य निर्गतः ॥ सहस्रोर्वंघ्रिबाह्वक्षः ॥
सहस्राननशीर्षवान् ॥३६॥ यस्येहावयवैर्लोकान् कल्पयंति मनीषिणः ॥ कट्यादिभिरधः सप्त सप्तोर्ध्वं ज
घनादिभिः ॥३७॥ पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ॥ ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रो व्यजायत ॥३८॥ भूर्लो
कः कल्पितः पद्भ्यां भुवर्लोकोस्य नाभितः ॥ हृदा स्वर्लोक उरसा महर्लोको महात्मनः ॥३९॥ ग्रीवायां जनलोकोऽस्य
तपोलोकः स्तनद्वयात् ॥ मूर्द्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ॥४०॥

न ऊर्ध्वं महरादीन् सप्त ॥३७॥ सर्ववर्णानां तत
उत्पत्तिं दर्शयति ॥ पुरुषस्येति ॥ ब्रह्म ब्राह्मणः मुखमिति कार्यकारणयोरभेदविवक्षयोक्तं ॥ बाहव इति बहूउरूश्चियः ॥३८॥ इदानीमुपा
सनार्थं लोककल्पनाभेदान् ॥ दर्शयन् सप्तलोककल्पनाभेदान् दर्शयन् सप्तलोकपक्षमाह ॥ भूर्लोकान् लोकपातालमारभ्य ब्रह्मांडं ॥३९॥ स्त
नद्वयादिति ॥ उपासनार्थत्वादूर्ध्वाधोभागवैपरीत्यं न दोषः ॥ यद्वा स्तनतस्त्रयं कुर्वेत पदो स्तनद्वयं तस्मादित्यर्थः ब्रह्मलोकः वैकुं

॥ कटिपर्यं
ताऽधोर

इदानीं चतुर्दशलोकपक्षं दर्शयति ॥ तत्र उरुघ्नादिभिः ऊर्वादयः पूर्वोक्ता एव सप्त कट्यादिभिरधः ॥ सप्त लोकानाह ॥ ततः कट्या
मिति द्वाभ्यां भुवं हरिनाभिनिवासत्वात् ॥ ४१ ॥ त्रिलोकपक्षमाह ॥ भूर्लोकः पातालादिसहितः स्वर्लोकः सत्यपर्यंतं ॥ ४२ ॥
इति द्वितीये पंचमः ॥ ५ ॥ वक्ष्ये विराड्विभूतिश्च प्रोक्ताध्यात्मादिभिर्द्वतः ॥ हृदीकृतं च पूर्वोक्तं सर्वं पुरुषसूक्ततः ॥ १ ॥ इदानीं वि
राडस्य विभूतिः ॥ सप्त पंच मनुवेद्यंते ॥ वाचां अस्मदादिवागिंद्रियाणां तदधिष्ठातुर्वह्नेश्च तस्य मुखं क्षेत्रं उत्प

तत्कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः ॥ जानुभ्यां सुतलं शुद्धं जंघाभ्यां तु तलातलं ॥ ४१ ॥ महातलं तु गुल्फा
भ्यां प्रपदाभ्यां रसातलं ॥ पातालं पादतलत इति लोकमयः पुमान् ॥ ४१ ॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोस्य ना
भितः स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ॥ ४३ ॥ इति श्रीद्वितीयस्कंधे पंचमोध्यायः ॥ ५ ॥ ब्रह्मो
वाच ॥ वाचां वह्नेर्मुखं क्षेत्रं छंदसां सप्त धातवः ॥ हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च ॥ सर्वासूनां च वायो
श्च तन्नासे परमायने ॥ अश्विनोरोषधीनां च घ्राणो मोदप्रमोदयोः ॥ २ ॥ रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य
चाक्षिणी ॥ कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः ॥ ३ ॥ तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनं ॥ ४ ॥

त्तिस्थानं ॥ छंदसां गायत्र्यादीनां सप्तानां सप्त धातवः ॥ त्वगादयः देहे तु हव्यं देवानामन्नं कव्यं पितॄणां अमृतं ॥ तदुभयशेषो मनु
ष्याणां तेषामन्नानां सर्वरसस्य मधुरादेः षड्विधस्य चकारादस्मदादिरसनेंद्रियस्य तदधिष्ठातुर्वरुणस्य च ॥ तस्या जिह्वा क्षेत्रमु
त्पत्तिस्थानं ॥ एवं सर्वत्रानुक्रममनुनेयं ॥ १ ॥ सर्वासूनाम् अस्मदादिप्राणानां तस्य नाम्नो नासारंध्रे परमायते उत्तमक्षेत्रे मोदप्र
मोदयोश्च सामान्यविशेषगंधयो घ्राणेंद्रियं परमायनं ॥ २ ॥ तेजसां रूपप्रकाशकानां चक्षुरिंद्रियं अक्षिणी नेत्रगोलकौ ॥
सर्वत्र पक्षद्वयं नानां प्रथमांतं देहे तु इष्टव्यं [illegible] तथा गात्रं शरीरं वस्तूनां ये साराः बलं तेजो जनं

अस्य त्वक् स्पर्शस्य वायोश्चेत्यर्थः ॥ सर्वस्य मेधस्य यज्ञस्य । उद्भिज्जातीनां सर्ववृक्षाणां यैर्वृक्षैर्यज्ञः सम्यक् साधितः तेषामेव ४ ॥ केशाने
घानां हेतुत्वं इत्यर्थः यथोक्तोः श्मश्रूणि विद्युतां पादकरनखाः ॥ शिलालोहानामिति सादृश्याद्बहुत्वं क्षेमकर्मणां पालनकर्तॄणां
५ विक्रमः पादन्यासो भूरादिलोकानां शरणस्य आश्रयः ॥ भूरादिस्थानानामभयत्वात् मध्यांतके मोलब्धरक्षणं शरणं ॥ सर्वे
षां कामानां वरस्य हरेश्चरणं आस्पदं वीर्यस्य शुक्रस्य शिश्नोऽधिष्ठानं उपस्थस्त्रींद्रियं । प्रजात्यानंदः ॥ संतानार्थसंयोगस्ते निर्वृ गिं

त्वगस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि ॥ रोमाण्युद्भिज्जातीनां यैर्वा यज्ञस्तु संभृतः ॥ ४ ॥ केशश्मश्रुनखान्य-
स्य शिलालोहाभ्रविद्युतां ॥ बाहवो लोकपालानां प्रायशः क्षेमकर्मणां ॥ ५ ॥ विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरण- २
स्य च ॥ सर्वकामवरस्यापि हरेश्चरण आस्पदं ॥ ६ ॥ अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः पुंसः शिश्न उपस्थ- सः
स्तु प्रजात्यानंदनिर्वृतिः ॥ ७ ॥ पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद ॥ हिंसाया निरृतेर्मृत्योर्निरयस्य गुदः ।
स्मृतः ॥ ८ ॥ पराभूतेरधर्मस्य तमसश्चापि पश्चिमः ॥ नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः ॥ ९ ॥ अव्यक्त-
रससिंधूनां भूतानां निधनस्य च ॥ उदरं विदितं पुंसो हृदयं मनसः पदं ॥ १० ॥ धर्मस्य मम तुभ्यं च कुमाराणां भवस्य
च ॥ विज्ञानस्य च सत्वस्य परस्यात्मा परायणं ॥ ११ ॥

ति: ॥ तापहानिस्तस्याः । ७ ॥ परिमोक्षस्य मलत्यागस्य पायुरिंद्रियं गु-
दोऽधिष्ठानं निरृतेरलक्ष्म्याः । ८ ॥ तमसोऽज्ञानस्य पश्चिमः पृष्ठभागः गोत्राणां अस्थिसंघातः । ९ ॥ अव्यक्तं प्रधानं रसः । अंबुदिसा-
रः । सिंधवः समुद्रास्तेषां निधनस्य लयस्य उदरं पदस्थानं विदितं ज्ञानिभिः मनसः । अस्मदादिलिंगशरीरस्य १० ॥ तुभ्यं तव कु-
माराणां सनकादीनां भवस्य श्रीरुद्रस्य आत्मा चित्तं परमायनं ॥ ११ ॥

एवंतावत्परमेश्वराज्जातं विश्वं तेनोनमितं यथा कुंडलं सुवर्णान्न पृथक् सतु सर्वनियंता सर्वप्रकाशको नित्यमुक्त इत्यर्थोक्तं एत
देव पुरुषसूक्तार्थकथनेन दृढयति । तत्र सहस्रशीर्षेत्यर्द्धर्चस्य । ब्राह्मणोस्य मुखमासीदित्यादेश्च ऋक्त्रयस्यार्थः पूर्वाध्याय
एव दर्शितः पुरुष एवेदं सर्वमित्यस्यार्थं दर्शयति ॥ अहं भवानिति सार्द्धैस्त्रिभिः । ते अग्रजाद्या मे सनकादयः । मरीच्याद्यश्च ॥ २२ ॥ ज
लं च स्थलं च नभः । ओकांसि येषां ते नभौकसः संधिरार्षः ॥ २३ ॥ सर्वं पुरुष एव । न ततः पृथगित्यर्थः ॥ २४ ॥ उपपंचेतेनैतस्यापरिच्छेदं वा
क्तुं स भूमिमित्यस्यार्थमाह ॥ तेन पुरुषेण विश्वमिति ॥ भूमिपदस्यार्थः वित्तममिति ॥ दशांगुलपदस्य । अधीत्यस्य शब्दस्य च वित

अहं भवान् भवश्चैव य इमे । मुनयोऽग्रजाः ॥ सुरासुरनरा नागाः खगा मृगसरीसृपाः ॥ गंधर्वाप्सरसो यक्षा रक्षो
भूतगणोरगाः ॥ पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः ॥ २३ ॥ अन्ये च विविधा जीवा जलस्थलनभौका
सः । ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः ॥ २४ ॥ सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत् ॥ तेनेदमावृतं विश्वं वित
स्तिमधितिष्ठति ॥ २५ ॥ स्वधिष्ण्यं प्रतपन् प्राणो बहिश्च प्रतपत्यसौ ॥ एवं विराजं प्रतपंस्तपत्यंतर्बहिः पुमान् ॥ सो
मृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् ॥ २६ ॥

स्तिमधिकं व्याप्य तिष्ठति ॥ आधिक्यमात्रं विवक्षितं ।५। न परिमाणं अनुप
योगादपरिच्छिन्नत्वाच्च ॥ एतत् सदृष्टांतमाह ॥ असौ प्राणः आदित्यः । असौ वा आदित्यः प्राण इति श्रुतेः स्वधिष्ण्यं मंडलं प्र
काशयन् यथा बहिश्च प्रकाशयति । २५ ॥ एवं विराड्देहं प्रकाशयन् ब्रह्मांडमंतर्बहिश्च प्रकाशयति । २५ ॥ नित्यमुक्तत्वं दर्शयितुं उ
तामृतत्वस्येत्यस्यार्थमाह ॥ स इति अन्नं यस्येति मंत्रे गतामृतत्वपदं व्याख्याय ॥ अन्नेनेति पदं विभक्तिव्यत्ययेन व्याचष्टे मर्त्यं मरण
धर्मकं अन्नं कर्मफलं यद्यस्मादत्यगात् । अतिक्रांतवान् अतो न केवलं सर्वात्मकः । किंतु अमृतत्वस्य नित्यानंदस्यापी । २०

प्रपंचात्मकस्य कुतो नित्यमुक्तत्वमित्याशंक्य तत्परिहाराय ॥ एतावानस्येत्यस्यार्थमाह ॥ महिमेति प्रपंचात्मकस्याप्यमृतेशत्वमित्येष महि
मा पुरुषस्य यः अपारः प्रपंचानित्यत्वादिविस्तारः । मंत्रेण च एतावानस्य महिमा इत्युक्तिः ॥ स तु ज्यायान् महत्तर इति विवदतायमेवार्थ उक्तः
॥१७॥ तदेव भूमीश्वरो नित्यमुक्त इत्युक्तं तदाश्रितानां भूतानां बंधमोक्षौ व्यवस्थापयेति दर्शयन् पादोऽस्य भूतानीत्यस्यार्थमाह ॥ पादेषु स्थिति
ति श्रुत्युक्तेति स्थितयो भूरादिलोकाः ॥ ते पादा इव पादाः । अंशा यस्य सः स्थितिपात्तस्य पादेषु अंशान् तेषु लोकेषु सर्वान् जीवान् विदुः
॥ मंत्रे हि पादोऽस्य विश्वा भूतानीति सामानाधिकरण्यमधिष्ठानाधिष्ठेयोपाचेरे विवक्षया पाद इत्येकवचनं सामान्याभिप्रायेणेति ॥ व्या
ख्यातं भवति भूतेषु फलवैचित्र्यं दर्शयन् । त्रिपादस्यामृतं दिवीत्यस्यार्थमाह ॥ अमृतमिति अस्येश्वरस्य संबंधि । त्रिपादमृतं नि

महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः ॥१७॥ पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः ॥ अमृतं क्षेममभयं त्रि
मूर्ध्नोधायि मूर्धसु ॥१८॥ पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः ॥

तं सुखं दिवि ॥ ऊर्ध्वलोकेषु न त्रिलोक्यामित्यर्थः । तदेव त्रिपाद्धि श्लोकं त्रैविध्यं दर्शयन्नाह ॥ त्रयाणां लोकानां मूर्ध्नि महर्लोकः
॥ तस्य मूर्ध्नि भुवनक्रमेण उपरितनलोकास्तेषु यथाक्रमं अमृतादिकं मूर्ध्नि अधायि निहितं ॥ तत्र त्रिलोक्यां नश्वरमेव सुखं महर्लोके ।
स्य क्रममुक्तिस्थानत्वेपि कल्पांते तत्रत्यानां स्थानत्यागान्नाविनाशि सुखं जनलोके त्वमृतमविनाशिसुखं यावज्जीवस्वस्था
नापरित्यागात् किंतु महर्लोकवासिनां कल्पांते त्रिलोकदाहोद्भवपीडितानां तद्दाहात्तत्रागमनादक्षेमत्वं जनमस्तितपोलोके तस्या
नावात् ॥ क्षेमं एवं वक्ष्यति हि त्रिलोक्यां दह्यमानायां सत्यां संकर्षणाग्निना । यांत्यूष्मणा महर्लोकाज्जनं भृग्वादयोर्दिता इ
ति सत्यलोके ॥ त्वभयं मोक्षः । तत्र त्यासते ॥१८॥ एतदेव वैचित्र्यमधिकारिभेदेनोपपादयन् त्रिपादूर्ध्व इत्यस्यार्थमाह ॥ पादा
इति न प्रजायंते पुत्रादिरूपेणेत्यप्रजाः नैष्ठिकब्रह्मचारिवानप्रस्थयतयस्तेषामाश्रमाः ॥

ना० टि०
२१

त्रिलोक्या बहिरासन् ॥ १८ ॥ गृहमेधस्त्वंतः यस्माद् बृहद्व्रतः ब्रह्मचर्यव्रतरहितः ॥ १९ ॥ अथ पंचाधिकारत्वेन एकस्यैवावस्थाभेदेन तत्वत्रयं तस्मिन् विषयद्वयमितिदर्शयंस्ततो विष्वङ्ङित्यस्यार्द्धं माह । सृती इति विविधं सु खु अश्नातीति विष्वङ् पुरुषः । ह्येचद्वः सृती मार्गौ दक्षिणोत्तरौ विचक्रमे व्याप्तवान् तिस्मकर्मणं तते सृती भुक्तानशनानशने भोगापवर्गौ च साधनत्वे ॥ अत्र हेतुत्वेन पुनर्विशेषणं यतः । अविद्या कर्मरूपा एका विद्या च तत्साधनोपासनारूपस्त्याह । २० । तदेवं विराड्रूपं विभूतिनोपलवै वि अमुत्वा रसस्य लक्षणं दर्शयितुं तस्माद्विराड् जायते तस्यार्थमाह यस्मादिति ॥ यस्मादंडं इत्यादि तेद्वि

तं तत्त्रिलोक्या सपरोगंहमेधोरवहद्व्रतः ॥ १९ ॥ सृती विचक्रमे विष्वक् साशनानशने उभे ॥ यदविद्या च विद्या च पुरुषस्तूभयाश्रयः ॥ २० ॥ यस्मादंडं विराट् जज्ञे भूतेंद्रियगुणात्मकः ॥ तद्द्रव्यमत्यगाद्विश्वं गोभिः । सूर्य इवातपन् ॥ २१ ॥ यदास्य नाभ्यान्नलिनादहमासं महात्मनः ॥ नाविदं यज्ञसंभारान् पुरुषावयवादृते ॥ २२ ॥ तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः ॥ इदं च देवयजनं कालश्चोरुगुणान्वितः ॥ २३ ॥

यगुणात्मको विराट् जज्ञे स ईश्वरः । तत् विश्वं विराट्देहं इत्यंडं च तिक्रांतवान् सूर्य इवेति पूर्वोक्त एव दृष्टांतः ॥ २१ ॥ नन्वे वं पुरुष एव चेत्सर्वं तर्हि यज्ञस्य तत्साधनानां च पृथग् जनो वा तत् ॥ यज्ञैः पुरुषाराधनं सिद्धेदित्याशंक्यात् तत्परिहाराय यत्पुरुषेणाह विषेत्यादिमंत्रार्थं संगृह्य दर्शयति ॥ यदेत्यादिना । अस्येति विराड्तर्यामिणः ॥ तस्यैव कृतत्वात् नाभौ नवं नाम्यन्तस्मात् । साधनानि नाप श्यंति । २२ । तदा तेषु साध्येषु सत्सु पुरुषावयवैः ॥ ता तु संभारा इति चतुर्थेनान्वयः । तानेव दर्शयति । मध्यमग्रं थेन । वनस्पतयो यूपादेवयजनं यज्ञभूमिः । इदं चेति च नाधज्ञाहं स्थाने उपविष्टः कथयतीति गम्यते । बहुगुण २१

वस्तूनि पात्रादीनि ओषधयो व्रीह्यादयः । स्नेहा घृतादयः ॥ रसा मधुरादयः ॥ सोमधुरादयः ॥ सौवर्णादीनि लोहानि मृदश्च ॥ २३
चातुर्होत्रं कर्म ॥ २४ नामधेयानि ॥ ज्योतिष्टोमादीनि ऋगादीनां मुक्तत्वात् ॥ मंत्रा इति स्वाहाकारादयः ॥ देवतानामनुक्र
मः देवताः ॥ कल्पो बोधायनादिकर्मपद्धतिग्रंथः अनेनाहं यक्ष्य इति संकल्पः । तंत्रमनुष्ठानप्रकारः ॥ २५ ॥ गतयो विष्णुक्रमा
द्याः मतयः तयोर्देवताध्यानानि हृतस्य ... वति समर्पणं । २६ ॥ संभृताः संपादिताः संभारा येन सोहं तेनैव यज्ञेनैव ॥ अनेन यज्ञ

वस्तून्योषधयः स्नेहा रसलोहमृदो जलं ॥ ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तमाः ॥ २४ ॥ नामधेयानि मं
त्राश्च दक्षिणाश्च व्रतानि च ॥ देवतानुक्रमः कल्पः संकल्पस्तंत्रमेव च ॥ २५ ॥ गतयो मतयश्चैव प्रायश्चित्तं सम
र्पणं ॥ पुरुषावयवैरेते संभाराः संभृता मया ॥ २६ ॥ इति संभृतसंभारः पुरुषावयवैरहं ॥ तमेव पुरुषं यज्ञं तेनै
वायजमीश्वरं ॥ २७ ॥ ततस्ते भ्रातर इमे प्रजानां पतयो नव ॥ अयजन् व्यक्तमव्यक्तं पुरुषं सुसमाहिताः ॥ २८ ॥
ततश्च मनवः काले ईजिरे ऋषयोऽपरे ॥ पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुं ॥ २९ ॥ नारायणे भगवति त
दिदं विश्वमाहितं ॥ गृहीतमायोरुगुणः ॥ सर्गादावगुणः स्वतः ॥ ३० ॥

तेनैव यज्ञमयजं तेति मंत्रार्थः सूचितः ॥ तेन देवा अयजंत इत्यस्यार्थं संप्रपंचयति । तत इति द्वाभ्यां ॥ व्यक्तं इंद्रादिरूपेण अव्य
क्तं स्वतः । अनेन पुरुषं जातमग्रत इत्यस्यार्थो दर्शितः ॥ २८ ॥ काले स्वस्वविसर्गे ॥ २९ ॥ यदधिष्ठानमित्येतत्प्रश्नोत्तरार्थमुप
संहरति ॥ नारायण इति ॥ आहितं अधिष्ठितं तत्र भगवत्त्वे हेतुः । यः स्वतोऽगुणः सर्गादौ गृहीतमायया उरवो गुणा येन स्थि
तेन ॥ ३० ॥

यत्परस्त्वमित्येतस्योत्तरं यदुक्तं स एष भगवान् सर्वेषां समस्त्वेश्वर इति तदुपसंहरति ॥ सृजामीति पालनं ॥ तु स्वयमेव करोती
त्याह । विश्वमिति पुरुषरूपेण विष्णुरूपेण त्रिशक्तिर्मायातां धारयतीति तथा सः । ३१ ॥ यच्चेदं यदात्मकश्च त्वमित्येवमादि सर्व
प्रश्नानां सामान्योत्तरं यदुक्तं वासुदेवात्परो ब्रह्मन् न चान्योर्थोस्ति ॥ ३२ । तत्त्वतइति पुरुषेण । इदं सर्वमिति स्फुटत्वाच्च यद्दृढीकृतं
तदुपसंहरति इतीति । कार्यकारणात्मकं भाव्यं सद्रूपं भगवतः । सकाशादन्यत् पृथक् न भवतीत्याभिहितं । ३२ । यदुक्तं एतावद्वे

सृजामि तन्नियुक्तोहं हरो हरति तद्वशः ॥ विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥ ३२ ॥ इति तेभिहितं तात
यथेदमनुपृच्छसि ॥ नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकं ॥ ३२ ॥ न भारती मेंग मृषोपलक्ष्यते न वै क्वचिन्मे न
सो मृषा गतिः ॥ न मे हृषीकाणि पतंत्यसत्पथे यन्मे हृदोत्कंठवता धृतो हरिः ॥ ३३ ॥ सोहं समाम्नायमयस्त
पोमयः प्रजापतीनामभिवंदितः पतिः ॥ आस्थाय योगं निपुणं समाहितस्तं नाध्यगच्छं यत आत्मसंभवं ॥ ३४ ॥

यतो हि मे तमविज्ञाय मामीश्वरं प्रब्रवीषीति तदुपपाद्योपसंहरति । न भारतीति ॥ यद्यस्मान्मे मया उत्कंठां न हृदु ईकः । न तत्युक्ते
न हृदा हरिर्हि धृतो ध्यातः अंग हे नारद ॥ अतः मे वाङ्मन इंद्रियाणां वृत्तयः । सत्यार्थाः । ननु मत्त एव वेदेनेत्यर्थः ॥ अत उत्थानुभव
मेवान्वय ॥ व्यतिरेकाभ्यां प्रमाण इति द्वाभ्यां ॥ सोहं समाम्नायादिभिः ॥ सर्वोत्कर्षोपि योगमास्थितापि यतः ॥ आत्मनो मम
संभवो उत्पत्तमेव तं न ज्ञातवान् । कुतोन्यस्य वार्ता ॥ एतच्च तृतीयस्कंधे पद्मोद्भवे वक्ष्यते । ३४ ॥

तदासमीयुषांत्वारणागतानां संसारनिवर्त्तकं मंगलावहं सुसेव्यं च तस्य चरणं नतोस्मि ॥ ततोऽविचिंत्यमहिमत्वेन ज्ञातवान
स्मीति कैमुत्यन्यायेनाह ॥ योहीति ॥ स्वमायाविविस्तारं यः । स्वयमपि पर्यगात ॥ परिज्ञाव्येति शेषः ॥ एतावानिति तज्ज्ञातवानि
त्यर्थः ॥ अपरे कुतोऽज्ञानी युक्तस्य चरणं नतोस्मीति पूर्वेण संबंधः । ननु सर्वज्ञः कथं न जानाति । अंतर्यामादितिहस्यां तेनाह । य स्मा
था स्वस्यांतं न वेत्ता प्रोक्तितद्वत ॥ न हि स्वपृष्ठमादर्शं विनं सार्वज्ञं विहि तं इतिभावः ॥ तथा च वक्ष्यति । वेदस्तु तौ ॥ क्षपत य एव तेनां
यपुरंतमनंतत्वात्त्वमपि यदंतरांडनिचया ननु सावरणा इत्यादि श्रुतिश्च योऽस्याध्यक्षः । परमे व्योमन सोऽग वेद या

ततोस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमंगलं ॥ यो ह्यात्ममायाविभवं स्म पर्यगाद्यथा नभः ।
स्वांतमथापरे कुतः ॥ ३५ ॥ नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुतापरे सुराः ॥ तन्मायया मोहितबुद्ध
यस्त्विदं विनिर्मितं चात्मसमं विचक्ष्महे ॥ ३६ ॥ यस्यावतारकर्माणि गायंति ह्यस्मदादयः ॥ न यं विदंति तत्त्वे
न तस्मै भगवते नमः ॥ ३७ ॥ स एष आद्यः पुरुषः कल्पे२ सृजत्यजः ॥ आत्मात्मँनात्मानं संयच्छति च पाति च न्यात्म
॥ ३८ ॥

देवा न वेदेति । ३५ ॥ एतत्प्रपंचयति नाहमिति द्वाभ्यां । वामदेवो रुद्रः । यस्य ऋतां गतिं परमार्थस्वरूपं किं त्विदं प्रपंचरूपं त ॥
स्य मायाविनिर्मितं विचक्ष्महे विद्मः । तदप्यात्मसमं स्वज्ञानानुरूपमेव न तु कृत्स्नं मोहितबुद्धय इत्यपरं तदज्ञाने प्रपंचहेतुः ३६
ननु सर्वेपि तं वर्णयंतो दृश्यंते तत्राह ॥ यस्येति । अवतारकर्माणि संक्षेपतो दर्शयति ॥ स एष आद्यो भगवान् यः । पुरुषाव
तारः । स तत्सृष्ट्यादि करोति ॥ आत्मात्मन्यात्मनात्मानमिति कर्त्ता करणं साधनं कर्म च स्वयमेवेत्यर्थः । पुरुषावतारस
ष्ट्यादीनि कर्माणीति संक्षेपोक्तिः । ३८ ॥

सर्वविदित तत्त्वेनेत्युक्तं तत्र किं तत्त्वमित्यपेक्षायामाह ॥ विशुद्धमिति ॥ ज्ञानं केवलं सत्यं तत्त्वं ॥ घटाद्याकारवृत्तिज्ञानव्यवच्छे
दार्थं विशेषणानि विशुद्धं विषयाकारशून्यं यतः प्रत्यक् सर्वांतरं ॥ अत एव सम्यक् संदेहादिरहितं अवस्थितं स्थिरं य
तो निर्गुणं गुण। कार्यं हि ॥ गुणव्यतिकराच्चंचलं भवतीति यद्यपि घटाद्याकारवृत्तिज्ञानमपि स्वेनरूपज्ञानमेवेति । न
चांचल्यादिदोषयुक्तं तथाप्यंतःकरणवृत्तिदोषैस्तथा तथा भवतीति व्यवच्छिद्यते ॥ एभिरेव विशेषणैः सत्यत्वमप
पि समर्थितं किं च यद्विकारवत् ॥ तदसत्यं दृष्टं नचास्य जन्मादयः ॥ षड्विकाराः संतीत्याह ॥ अनाद्यंतं जन्मनाशरहितं

विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितं ॥ सत्यं पूर्णमनाद्यंतं निर्गुणं नित्यमद्वयं ३९ ॥ ऋषे
विदंति मुनयः प्रशांतात्मेंद्रियाशयाः ॥ यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतं ४० ॥

अत एव जन्मानंतरास्तित्वलक्षणोपि विकारो नास्ति ॥ वृद्धिविपरिणामापक्षयाश्च न संति । यतः पूर्णं सर्वत्र हेतुः । नित्य
मद्वितीयं नित्यं सर्वदा द्वैतप्रतीतिसमयेपि परमार्थतो द्वयमिति ऋषे ॥ अत्र विद्वदनुभवं प्रमाणयति हे ऋषे । नारद प्र ८
शांतात्मेंद्रियाशयाः । प्रसन्नदेहेंद्रियमनसो यदा भवंति तदा विदंति ॥ अन्यदा तत् ज्ञानकारणमाह ॥ यदा तु तदेव प्रा
कान्नामानमेव असतां तर्कैः । विप्लुतं तत् स्यात् तदा तिरोधीयेतेति ४० ॥ ३३

कल्पे कल्पे आत्मानं सृजतीत्युक्तं किं यत्तैस्सृज्यमाना अवताराः। तान् विस्तारेणाह॥ आद्य इत्यादिना यावत्समाप्तिः॥ परस्य भूम्नः पु
प्र रुषः प्रकृतिप्रवर्तकः॥ यस्य सहस्रशीर्षेत्युक्तो लीलाविग्रहः स आद्योऽवतारः॥ वक्ष्यति॥ भूतैर्यदा पंचभिरात्मसृष्टैः॥ पुरं विराजं
विरचय्य तस्मिन् स्वांशेन विष्टः। पुरुषाभिधानमवाप नारायण आदिदेव इति॥ तंत्रे यथा कविक्षोत्सृजीणि रूपाणि पुरुषा
ख्यान्यवतारत्वमुच्यते तथापि कालस्य स्वभावस्य सदसदिति कारणात्मिकायाः प्रकृतेश्च॥ एता ऋत्वयः मनआदीनि।

आद्योऽवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च॥ द्रव्यं विकारो गुण इंद्रियाणि विराट् स्वराट्
व स्थास्नु चरिष्णु भूम्नः॥ ४१॥ अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च॥ स्वर्लोकपालाः खग
लोकपाला नृलोकपालास्तललोकपालाः॥ ४२॥ गंधर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागना
थाः॥ ये वा ऋषीणामृषभाः पितृणां दैत्येंद्रसिद्धेश्वरदानवेंद्राः॥ ४३॥ अन्ये च ये प्रेतपिशाचभूतकूष्मां
डयादोमृगपक्ष्यधीशाः॥ ४४॥

कार्याणि ब्रह्मादयो गुणावतारैः दक्षादयोऽन्तरयः। इति विवेकः। अव्यक्तं मनः॥ महत्तत्त्वं द्रव्यं महाभूतानि क्रमोऽत्र न विवक्षितः वि
कारोऽहंकारः गुणाः सत्त्वादिः। विराट् समष्टिशरीरं स्वराट् वैराजः स्थास्नु स्थावरं चरिष्णु जंगमं च व्यष्टिशरीरं॥ ४१॥
अहं ब्रह्मा भवो रुद्रः यज्ञो विष्णुः दक्षादयोऽमी प्रजेशाः ततः लोकपालाः॥ पातालाद्यधिपतयः॥ ४२॥ गंधर्वादीनामी
शाः दक्षादीनां नाथाः॥ रक्षोरगेति संधिरार्षः॥ ऋषीणां पितृणां च श्रेष्ठाः॥ ४३॥ प्रेतादीनामधीशाः॥ ४४॥

विंबकुनाय किंचिद्भगवदादि तत्सर्वं परमेव तत्त्वमित्यन्वयः ॥ भगवत् ऐश्वर्ययुक्तं ॥ ओजः सहः सं इंद्रियमनः ॥ शक्तीतदस्तं ब-
लं देहसं श्रीः शोभा ह्रीः अकार्मजुगुप्सा विभूतिः संपत्तिः आत्मबुद्धिः ॥ तद्युक्तं अर्णो वर्णः ॥ अद्भुतार्णं आश्चर्यवर्णमित्यर्थः
रूपमेव स्वरूपं रूपवत् ॥ अस्वरूपमरूपं च ॥ येतत् सर्वं परं तत्त्वं तद्विभूतिरित्यर्थः ॥ ४४ ॥ मुख्यसत्त्वावतारान् वक्तुमाह
प्राधान्य इति ॥ असलक्ष्या(?) श्रवणे ये कर्णयोः ॥ कषायोः मलाः ॥ तान् शोधयंती लिलया तान् ॥ सुपेशान् सुंदरान् सकारः

स्व यत्किंच लोके भगवन्महस्वदोजः सहस्वद्बलवत् क्षमावत् ॥ श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवद-
स्वरूपं ॥ ४४ ॥ प्राधान्यतो यानृष आमनंति लीलावतारान्पुरुषस्य भूम्नः ॥ आपीयतां कर्णकषाय-
शोषाननुक्रमिष्ये त इमान् सुपेशान् ॥ ४५ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे षष्ठोऽध्यायः
६ ॥ ब्रह्मोवाच ॥ यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत् क्रौडीं तनुं सकलयज्ञमयीमनंतः ॥ अंतर्महार्ण-
व उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार ॥ १ ॥

लोपस्थार्थः ॥ हे ऋषे हे तु त्वं ॥ अनुक्रमिष्ये तदनुक्रमणं मृतं त्वया पीयतामित्यर्थः ॥ यद्वा पीयतामिति त्राते [illegible] अपिपिबतां कर्ण-
कषायशोषानित्यर्थः ॥ ४५ ॥ द्वितीये षष्ठः ६ ॥ सप्तमे भगवल्लीलावतारा ब्रह्मणोदिताः ॥ नारदाय तु तत्कर्म प्रयोजन गुणैः
सह ॥ यज्ञतावद्वाराहावतारमाह ॥ यत्रेति क्षितितलोद्धरणार्थं वाराहीं तनुं बिभ्रत् उद्यतोऽनंतः ॥ तदा तं सुप्रसिद्धं हिरण्या-
क्षं दंष्ट्रया ददार ॥ १ ॥

यज्ञावतारमाह ॥ रुचेः प्रजापतेः सकाशात्तद्भार्यायाः ॥ आकूतेः सूनुः सुयज्ञो नाम जातः स च स्वभार्यायां दक्षिणायां सुयमान्दे
वान् अजनयत् स एवेंद्रः सन् यदा आर्त्तिं महतीं अहरत् तदा पूर्वं यज्ञ इत्युक्तोपि अनु पश्चात् मनुना मातामहेन हरिरित्युक्तः । अतएव दे
वो त्यादनंतलोकत्रयार्त्तिहरणं च तस्य कर्मदर्शितं ॥ एवं सर्वत्रावतारस्तत्कर्म च द्रष्टव्यं कपिलावतारमाह ॥ कर्दमस्य प्रजाप
तेर्गृहे च तद्भार्यायां देवहूत्यां जज्ञे ॥ नवभिः स्त्रीभिः सह स्वमात्रे आत्मगतिं ब्रह्मविद्यां उक्तवान् यया आत्मगत्या सा आत्मनः
शमलं मलिनीकरणं गुणसंगरूपं पंकं । अस्मिन्नेव जन्मनि विधूय कपिलस्य गतिं मुक्तिं प्राप्तवती ॥ ३ ॥ दत्तात्रेयावतारमा

जातो रुचेरजनयत्सुयमान्सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायां ॥ लोकत्रयस्य महतीमहरद्यदार्त्तिं स्वा
यंभुवेन मनुना हरिरित्यनूक्तः ॥ २ ॥ जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ॥ ऊचे
ययात्मशमलं गुणसंगपंकमस्मिन्विधूय कपिलस्य गतिं प्रपेदे ॥ ३ ॥ अत्रेरपत्यमभिकांक्षत आह तुष्टो दत्तो
मयाहमिति यद्भगवान्स दत्तः ॥ यत्पादपंकजपरागपवित्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ॥ ४ ॥
तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोऽभूत् ॥ प्राक्कल्पसंप्लवविनष्टमिहात्मतत्वं स
य म्यग्जगाद मुनयो यदचक्षतात्मन् ॥ ५ ॥

ह । मयाहमेव तुभ्यं दत्त इति । स दत्त आह ॥ ततः स नाम्ना दत्तो जातः स्वभक्तेभ्यो योगै
श्वर्यं दत्तं । तच्चरितं दर्शयति ॥ यस्य पादपंकजयोः । परागैः तैः पवित्रा देहा येषां ते उभयीं ऐहिकीं आमुष्मिकीं च भुक्तिरूपां मुक्ति
। ४ । कुमारावतारमाह ॥ मे मया आदौ यत्तपस्तप्तं तस्मात्स्वतपसः सत्यप । हेतोः स हरिः चतुःसनोऽभूत् सनत्कुमारः सनकः
सनंदनः सनातन इति चत्वारः ॥ सनशब्दा नाम्नि यस्य सः कथंभूतात् स्वतपः अखंडितात् यद्वा सुतपसः सनात्
दानात् समर्थयोगात् इत्यर्थः । प्राक्कल्पस्य संप्लवे प्रलये विनष्टं उच्छन्नं संप्रदायमात्मतत्वं इह अस्मिन् कल्पे

समस्य कडंगादुङ्कृतवान् ॥ सम्यक्त्वं दर्शयति यत्कृतितन्मात्रमेव मुनयः ॥ आत्मन् मतसि अचच्छलसाद्गादपश्यन् ॥५॥ नर
नारायणावतारमाह ॥ धर्मस्य पत्न्यां दक्षदुहितरि मूर्त्तिसंज्ञायां नारायणो नर इति मूर्त्तिद्वयेन जातः कथंभूतः स्वः असा
धारणस्तपःप्रभावो यस्य तदेवाह ॥ अनंगस्य पृतना देव्योऽप्सरसः भगवतः सकाशात् आत्मनः ॥ स्वप्रतिरूपाः ॥ उर्वश्या
द्याः स्त्रियो दृष्ट्वा तस्य नियमावलोपं ॥ व्रतभंगं घटितुं साधयितुं न शेकुः यद्वा ॥ आत्मनः स्वस्य योनि यमः ॥ तपो नाशं न
पः ॥ तस्यावलोपं तत्र दृष्ट्वा भगवतस्तं घटयितुं न शेकुः रिति ॥ एतच्चाख्यानमेकादशे नविष्यति ॥६॥ यत्तु कामविडं

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः ॥ दृष्ट्वात्मनो भगवतो नियमावलोपं
देव्यस्त्वनंगपृतना घटितुं न शेकुः ॥६॥ कामं दहंति कृतिनो ननु रोषदृ[illegible]ष्ट्या रोषं दहंतमुत ते न दहंत्यस
ह्यं ॥ सोयं यदंतरमलं निविशन् बिभेति कामः कथं नु पुनरस्य मनः श्रयेत ॥७॥ विद्धः सपत्न्युदितपत्रिभिरंं
ति राज्ञो बालोपि नूपगतस्तपसे वनानि ॥ तस्मा अदात् ध्रुवगतिं गृणते प्रसन्नो दिव्याः स्तुवंति मुनयो य
दुपर्यधस्तात् ॥८॥

यी क्रोधोपि बिभेतीति ॥ तत्र वराकः कामो न प्रभवतीति किं वक्तव्यं इत्याह ॥ काममिति कृतिनः श्रीरुद्रप्रमुखाः रोषयुक्तया
दृष्ट्या कामं दहंति ॥ रोषवत्त्वात्तं दहंतमपि ते न दहंति क्रोधेनापि न यंत इत्यर्थः ॥ नु अहो सोयं रोषः यदंतरं यन्मध्यं अवि
शन्नलं बिभेति ॥ यद्वा यस्यांतर्मनः कथं नु तं प्रमलं निर्मलं प्रविशन्निति ॥७॥ वरिष्ठैर्लोकमन्यवतारं सूचयति ॥ मात
तुः सपत्न्या सुरुच्या उदितानि दुरुक्तानि वाक्यान्येव पत्रिणो बाणाः ॥ तैर्विद्धो ध्रुवः ॥ राज्ञः उत्तानपदः अंतिसमीपे [illegible] तपस्त
स्तुं ॥ ध्रुवगतिं ध्रुवपदं यदुपरि स्थितं अधस्तात् स्थिताः ॥ दिविभवा दिव्याः सप्तर्षयः स्तुवंति ॥ यद्वा उपरि भगवान्स्य

स

२५

पृथ्व्यवतारमाह यत इति यदा सदर्विभिरर्पितः तद्भावेनं त्राताप्रसन्नर्षे तत्पुत्र इति पदं नामलेभे॥ पुन्नाम्नो नरकाद्यस्मा
त्पितरं त्रायते सुतः॥ तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति। पुत्रपदव्युत्पत्तिः। कथंभूतं वेनं द्विजानां शाप वाक्यमे
व वज्रं तेन विप्लुष्टं दग्धं पौरुषं भगं जमेभ्यः यं च यस्य तच्चरित्रं तमाह॥ येन च डग्गातिजगद्वर्षे वत्स्यमिति अन्नादिद्रव्याणि च।
सुधां जो रूपधरा दुग्धाः॥ ९॥ ऋषभावतारमाह। असौ हरिर्नाभेरग्नीध्रपुत्रात्सुदेव्याः। सुनुरासामानां न र्यापायामेरुदेव्याः॥
एवं सुदेवीत्यपि सता॥ जडवद्योगेन नित्यसमाधिना चर्यां यदितियां॥ तत्र हेतुः समदृक् तत्रापि हेतुः। स्वस्थः स्वस्वरू

यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरयेपतंतं॥ त्रात्वार्थितो जगति पुत्रपदं च लेभे दु
ग्धा वसूनि वसुधा सकलानि येन॥ ९॥ नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृक् जडयो
गचर्यां यत्पारहंस्यमृषयः पदमामनंति स्वस्थः प्रशांतकरणः परिमुक्तसंगः॥ १०॥ सत्रे ममास भग
वान् हयशीरषाथो साक्षात्स यज्ञपुरुषस्तपनीयवर्णः॥ छंदोमयो मखमयोखिलदेवतात्मा
वाचो बभूवुरुशतीः श्वसतोस्य नस्तः॥ ११॥ मत्स्यो युगांतसमये मनुनोपलब्धः क्षोणीमयो निखिला
जीवनिकायकेतः। विस्रंसितानुरुभये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गाम्॥ १२॥

पेक्षितयतः प्रशांतेंद्रियः। तत्कुतयतः परितो मुक्तसंगः॥ १०॥ हयग्रीवावतारमाह। सत्र इति। अथो इत्यनंतरे॥ स एव साक्षा
द्भगवान् मम ब्रह्मणः सत्रे यज्ञे हयशीर्षा आस तपनीयं सुवर्णं तद्वत् वर्णो यस्य। छंदोमयः तद्विधेयाये मखाः तन्मयः अ
मृतमय इति पाठः॥ मखैर्यज्ञनीयाश्च खिलादेवतास्तदात्मा च॥ अस्य श्वसतः श्वासमुंचतो नास्तो नासापुटात्॥ उशती॥ उश्चा

भा०द्वि०
२६

मत्स्यावतारमाह॥ मत्स्यो नाविनाबद्धवर्त्तते न मनुना सत्यव्रतेन राज्ञा दृष्टः क्षोणीमयः। पृथ्वी प्रधानः तदाश्रयत्वर्थः अ
तएव निखिलजीवनिकायानामाश्रयः। मे मुखाद्विस्रंसितान् वेदरूपमार्गान् वेदानादाय तत्र युगान्तसलिले विजहार हर्षेण।१२
कूर्मावतारमाह। क्षीरोदधौ कच्छपवपुः सन् गोत्रं मथनार्थं मंदरगिरिं पृष्ठे विधृतवान् कदा अमृतलब्धये क्षीराब्धिमु
न्मथ्नतां सतां निद्रयाः क्षण अवसरः॥ उत्सवो वा यस्य सः निद्राक्षणः निद्रावसरः॥ कुतस्तत्राह॥ अद्रेः परिवर्तः परिभ्रमः स एव कषाणः

क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धय आदिदेवः॥ पृष्ठेन कच्छपवपुर्विदधार गोत्रं निद्राक्षणो
ऽद्रिपरिवर्त्तकषाणकंडूः॥१३॥ त्रैविष्टपोरुभयहा स नृसिंहरूपं कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रं॥ दैत्येंद्रमा
शु गदयाभिपतंतमाराद् ऊरौ निपात्य विददार नखैः स्फुरंतं।१४॥ अंतःसरस्युरुबलेन पदे गृहीतो ग्राहेण यूथ
पतिरंबुजहस्त आर्तः॥ आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रवणमंगलनामधेय।१५। श्रुत्वा ह
रिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः॥ चक्रेण नक्रवदनं विनिपाट्य तस्मात् हस्ते प्रगृ
ह्य भगवान् कृपयोज्जहार।१६॥

कषतं घर्षणं सुखप्रदो यस्यासा कंडूर्यस्य सः यद्वा अद्रिपरिवर्त एव कर्षः कषणं तेन अनति
अपयातीति कषाणा कंडूर्यस्य॥१३॥ श्रीनृसिंहावतारमाह॥ त्रैविष्टपा देवाः तेषामुरुभयं हंतीति तथा स भगवान् कथंभूतं भ्रमं
त्यौ भ्रुकुट्यौ दंष्ट्राश्च यस्मिन् तत्करालं वक्त्रं यस्मिन्॥ ततश्चारात् समीपे स्फुरंतं गदया उपलक्षितं अभिपतंतं दैत्येंद्रं हिरण्यकशि
पुं नखैर्विददार।१४। हरिसंज्ञावतारमाह॥ अंतरिति यूथपतिः गजयूथस्य पतिः। तीर्थरूपं श्रवो यस्य स तीर्थश्रवाः। तत्संबोधनं हे ता
र्थश्रवः श्रवणेनैव मंगलं नामधेयं यस्य।१५। तद्वचनं श्रुत्वा शरणार्थिनं तं हस्ते भुजायां प्रगृह्य किं कृत्वा नक्रस्य ग्राहस्य वदनं वि

२६

वामनावतारमाह॥ अदितेः सुतानां द्वादशादित्यानां मध्ये अधियज्ञः॥ यज्ञाधिष्ठाता विष्णुः अवरजः। कनीयानपि गुणैर्ज्यायान् श्रेष्ठः
गुणानेवाह। यद्यस्मात् लोकान् विचक्रमे पादन्यासैः क्रांतवान्॥ अथ प्रतिश्रुतानीतरमेव तत्र हेतुः बलेः क्ष्मां वामनरूपेण जगृ
गृहे तन्वीश्वरः ~~श्चे~~ किमिति दुर्बलवत् तयाचक्रे॥ तत्राह॥ याच्ञां विना धर्ममार्गे। वर्त्तमानो प्रभुभिर्न चाल्य ऐश्वर्यात् इति चि
न्तनीयः १७। ननु तर्हि याच्ञयापि चालनमनुचितमेवेत्याशंक्य ततोधिकं स्वसालोक्यादि दास्यामीत्याशयेन ह तवानित्याह॥ नार्थ इ
ति यद्विबुधाधिपत्यं इदानीं बलात् प्राप्तं अग्रे दीयमानं च अयं बलेः। पुरुषार्थो न भवति। कुत इत्यत आह॥ आम्मप इति छेदः

ज्यायान् गुणैरवरजोप्यदितेः सुतानां लोकान् विचक्रम इमान् यदथाधियज्ञः॥ क्ष्मां वामनेन जगृहे त्रिपद
छलेन याच्ञामृते पथि चरन् प्रभुभिर्न चाल्यः॥ १७॥ नार्थो बलेरयमुरुक्रमपादशौचमापः शिखां धृतवतो विबु
धाधिपत्यं॥ यो वै प्रतिश्रुतमृते न चिकीर्षदन्यत्। आत्मानमंग शिरसा हरयेऽभिमेने॥ १८॥ तुभ्यं च नारद भृशं भग
वान् विवृद्धभावेन साधु परितुष्ट उवाच योगं॥ ज्ञानं च भागवतमात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरंजसैव १९

॥ उरुक्रमस्य पादशौचं चरणक्षालनरूपा अपः। आसर्वतो धृतवतः शिखायां मूर्ध्नीत्यर्थः॥ किंच शुक्रेण वारितः स
न्नोपि अंग हे नारद प्रतिश्रुतं विना अन्यत न चिकीर्षत्न कर्त्तुमैच्छत् यः॥ तृतीयपादपूरणार्थं हरये॥ आत्मानं देहमपि अभिमेने॥
अंगीकृतवान्॥ एवं सदेहं त्रैलोक्यं अदद्यात् तवतो विबुधाधिपत्यम् पुरुषार्थो न भवतीत्यर्थः॥ १८॥ हंसावतारमाह। तुभ्यमिति। भृशं विवृ
द्धेन भावेन अत्युद्रिक्तया भक्त्या परितुष्टः सन् भक्तियोगं साधु यथा तथा। उवाच ज्ञानसाधनं किं तत् भागवतं नाम कथं भूतं तत्त्व
मेव सतत्त्वं आत्मतत्त्वदीपकं विवृद्धभावेनेति विशेषणस्य फलमाह॥ यदिति॥ १९॥

भा० द्वि०
२७

तत्र मन्वंतरावतारमाह चक्रमिति ॥ स्वतेजः निजं प्रभावं चक्रं सुदर्शनं बिभर्त्ति । चक्रवदप्रतिहतं भावं बिभर्त्तीत्यर्थः तदेवाह ॥ म
नुवंशपालकः सन् त्रयाणां लोकानां शेषे उपरिस्थिते सत्यलोके पिकमनीयां स्वकीर्त्तिं विस्तारयन् राजसु दंडं विधत्ते ॥ २० ॥ ध
न्वंतर्यवतारमाह ॥ लोके अवतीर्य धन्वंतरिः ॥ सन् पुरुरुजां महारोगिणां स्वनाम्नैव रुजः ॥ रोगान् हंति ॥ स्वयमेव कीर्त्तिरि
ति ॥ अमृतं मरणमृत्युमायुर्यस्मात् सः अवरुद्धं वसनं पूर्वं दैत्यैः ॥ अतिरुद्धं यज्ञभागं च अवरुंधे लभते ॥ वा यरुद्धमिति
वा पाठे प्ययमेवार्थः ॥ आयुर्विषयं वेदं चानुशास्ति प्रवर्त्तयति ॥ २१ ॥ परशुरामावतारमाह ॥ जगतः उपायविधनादै

चक्रं च दिक्ष्वविहतं दशसु स्वतेजो मन्वंतरेषु मनुवंशधरो बिभर्त्ति ॥ दुष्टेषु राजसु दमं व्यदधात्स्वकी
र्त्तिं सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः ॥ २० ॥ धन्वंतरिश्च भगवान् स्वयमेव कीर्त्तिर्नाम्ना नृणां पुरुरुजां
रुज आशु हंति ॥ यज्ञे च भागममृतायुरवावरुंध आयुष्यवेदमनुशास्त्यवतीर्य लोके ॥ २१ ॥ क्षत्रं क्षयाय विधिनो
पभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्त्तिलिप्सु ॥ उद्धंत्यसाववनिकंटकमुग्रवीर्यस्त्रिःसप्तकृत्व उरु
धारपरश्वधेन ॥ २२ ॥ अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे ॥ तिष्ठन्व
नं सदयितानुज आविवेश यस्मिन्विरुध्य दशकंधर आर्त्तिमार्च्छत ॥ २३ ॥

बेन उपभृतं संवर्द्धितं मृतमेव समर्पित
मिति वा ॥ ब्राह्मणेभ्यो द्रुह्यतीत्यथा अतः उज्झितः पंथा वेदमार्गो येन ॥ अत एव नरकार्त्तिलिप्सतीव ॥ एवं भूतं अवनेः कंटकरूपं
क्षत्रं असौ महात्मा हरिः उद्धंति उत्पाटयति दीर्घतीक्ष्णधारेण परशुना ॥ रामावतारमाह त्रिभिः ॥ अस्माकं ब्रह्मादीनां प्रसादे सु
मुखः ॥ कलया भरतादिरूपया सह कलेमीपातस्या ईशः गुरोर्दशरथस्याज्ञायां तिष्ठन् सीतालक्ष्मणाभ्यां सहितो वनमाविवे २७

यस्मै रामाय उदधिमार्गं ददौ ॥ स एव दिशी घ्नं हरो यथा त्रिपुरं दिधक्षुः ॥ तं घ्नत अरिपुरं लंकां दग्धुमिच्छोः षष्ठी चतुर्थ्यर्थे यथा पंचमीयां
द्विवक्षे रामात् ऊढं प्राप्तं यद्व्रयं तेन अंगेषु वेपथुः कंपो यस्य ॥ अत्र हेतुः दूरे वर्त्तमाना सुहृत् सीता तया निमित्तं लयो मथितः । क्रोधितो
योरोषः तेन समुद्गीर्णा अत्यरुणा दृष्टिः ॥ तया आत्मतंत्रं तत्याजाततं ॥ मकरालांडरगाणां नक्राणां च चक्रं यस्मिन् [illegible] ॥ युद्धे रावणस्य
वक्षस्थलस्पर्शेन रुग्णाये महेंद्रवाहस्य ऐरावतस्य दंताः तैर्विडंबिताः ॥ स्वधवलिम्ना धवलीकृताः । तत्तद्दिक्षु पतितैः । प्रकाशिताह

यस्मात्प्रतापदुदधिरूढनयांगवेपथो मार्गं स पद्य रिपुरं हर वद्दिधक्षो ॥ दूरेसुहृन्मथितरोषसमुद्गीर्णदृष्ट्या
तातप्यमानमकरोरगनक्रचक्रं ॥ २४ ॥ वक्षस्थलस्पर्शरुग्नमहेंद्रवाहदंतैर्विडंबितककुब्धसरूढहासं ॥ स
द्योमुनिः सहविनेष्यतिदारहर्तुर्विस्फूर्जितैः धनुषउच्चरतोरिसैन्ये ॥ २५ ॥

स्वर्थः ॥ याएवं कृताः । ककुभो दिशः । कुभृतो सेवतो सेवते पालयतीति ॥ तया तस्य । दारहर्त्तुः रावणस्य अहो मत्समं कोन्योऽस्तीति मदा-
गर्वेण ऊढं प्राप्तं हासं स मुनिः प्राणैः सह ॥ सद्यस्त्रीघ्नं विनेष्यति केऽर्थ तुषो विस्फूर्जितैः ॥ टंकारघोषैः रेखकथं भूतस्य । अधिसे-
ने परसैन्यस्य मध्ये उच्चरतः ॥ उत्कर्षेण विचरतः । ककुब्धयरूपरूढाहासमिति पाठे दंतैरुज्वलितानां ककुभां उपयेन योरूढ-
हासः ॥ संजातो गर्वः ॥ तपमनेष्यतीत्यर्थः ॥ २५ ॥

श्रीकृष्णावतारमाह॥ भूमेरिति द्वाभ्यां। सुरेतराः॥ असुरांशासंभूताः॥ राजानस्तेषां वरूथैः सैन्यैर्विमर्दितायाः। भारेण पीडितायाः॥ कल
यारामेण सह जातः ननु कोसौ जातः॥ सितकृष्णकेशो यस्य भगवत॥ स एव साक्षाज्जातः सितकृष्णकेशत्वं नो भवनतनुवयः। परिणा
मकृतं अविकारित्वात् यत उक्तं विष्णुपुराणे उज्जहारात्मनः॥ केशौ सितकृष्णौ महामुने इति यच्च भारते॥ सच्चापि केशौ हरिरुच्चक
र्ब शुक्लमेकमपरं चापि केशाविशातां यदूनां कुले स्त्रियौ रोहिणीं देवकीं च॥ तयोरेको बलभद्रो बभूव योसौ श्वेतस्तस्य देवस्य के
शः। कृष्णो द्वितीयः केशवः। संबभूव केशो योसौ वर्णतः कृष्ण उक्त इति। तत्तु न केशमात्रा भिप्रायं किंतु भारावतारणरूपं कार्यं किय

कृष्णतौ

भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययायकलयासितकृष्णकेशः॥ जातः करिष्यति जनानुपलक्ष्यमार्गः
कर्माणि चात्ममहिमोपनिबंधनानि॥ २६॥ तोकेन जीवहरणं यदुलूकिकायाः त्रैमासिकस्य च पदा शक
टोपवृत्तः॥ यद्रिंगतांतरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथार्जुनयोर्नभाव्यं॥ २७॥

देतत्॥ मत्केशावेव तत्कर्तुं शक्ताविति द्योतनार्थं रामकृष्णयोर्वर्णस्य च केशोद्धरणमिति गम्यते॥ अन्यथा तत्रैव पूर्वापरविरोधापत्तेः
॥ कृष्णस्तु भगवान्स्वयमित्येतद्विरोधाच्च। कथंभूतः। परमेश्वरतया जनैः॥ अनुपलक्ष्यो मार्गो यस्य तर्हीश्वरत्वे किं प्रमाणं अतिमा
नुषकर्मान्यथानुपपत्तिरेवेत्याह॥ आत्मनो महिमा उपनिबध्यते॥ अभिव्यज्यते येषु तानि। एतदेव प्रपंचयति॥ २६॥ तोकेनेत्यादिना।
बालेन सता तनाया जीवहरणं। यत् रिंगता जानुभ्यां गच्छता तेन अंतरगतेन दिविस्पृशौ। अर्जुनयोः॥ इतरथा अनीश्वरत्वेन तन्न भवितव्यं
॥ २७॥

विषतोयपीतान् विषमतोयस्यपीतं पानं ये वां तान् पालान् गोपांश्च लब्धा दृष्टिसुधावृष्ट्या जीवयिष्यतीति यमुनायां क्रीडन् ॥ दुरगं काली यं दुच्चाटयिष्यति ॥ तच्छुद्धं यतस्माद्धृदिन्याति दिषलाय अनिर्विण्णविलोलाचंचलाजिह्वा यस्य ॥२७॥ दिव्यमलोकिकं इवेति लोकोक्तिः ॥ नुनेष्यति उद्दरिष्यति ॥ शुचिर्ग्रीष्मः ॥ तत्संधिनिधाने शुष्कद्रुमपर्णः ॥ अतो दावाग्नेर्हेतोः ॥ अवसितो निश्चितो अंतकालो यस्य तं सबलः सरामः ॥ अनधिगम्यं दुर्ज्ञेयं वीर्यं यस्य तत्र निशि तिः शयानमिति कालिपदमन्तराहूर्ययमुनातीरे तेते पिधाय पिहितेकारयिवे ॥

यदैद्धतेषु जयश्चनविषतोयपीतान् वालांस्त्लज्जीवयदनुग्रहदृष्टिरष्टा ॥ तच्छुद्धये सि विषवीर्यविलोलजिह्वं मुच्चाटयिष्यदुरगं विहरन् ह्रदिन्यां ॥२८॥ तत्कर्मदिव्यमिव यन्निशिनिःशयानं दावाग्निनाशुचिवने परिदह्यमाने । उन्नेष्यति व्रजमतोवसितांतकालं नेत्रे पिधाय सबलोनधिगम्यवीर्यः ॥२९॥ गृह्णीत यद्युपवंधममुष्यमाता शुल्वं सुतस्य न तु तत्तदमुष्य माति ॥ यज्जृंभतो स्य वदने भुवनानि गोपी संवीक्ष्य शंकितमनाः प्रतिबोधितासीत् ॥३०॥ नंदं मोक्ष्यति भयाद्वरुणस्य पाशात् गोपान्बिलेषु पिहितान् मयसूनुनाच ॥ अह्न्यापृतं निशि शयानमतिश्रमेण लोकं विकुंठमुपनेष्यति गोकुलं स्म ॥३१॥

तिमुंच्चाटयाम्यिति द्वेष ॥२८॥ उपवधाते अनेनेति उपबंधं तत्साधनं शुल्वं दाम ॥ अमुष्यमाता यशोदा ॥ अगृहीत न तु तत्तद मुख्योदरे मीति ॥ वधेन तस्मितं न जनवति ॥ नपूर्णतइत्यर्थः ॥ गोपी यशोदा संवीक्ष्य दृष्ट्वा प्रतिबोधितानि दृष्ट्वा स्वयं ज्ञापिता आसीत् ॥ इति यत ॥ तच्चकर्म दिव्यमेवेति सर्वत्र एवं योज्यं ॥ वरुणस्यपाशात् पद्भ्यं तस्मात् मोच्यति मोचयिष्यति ॥ मयसूनुना ओमनाम्ना व्याप्तं व्यापारयुक्तं निशिशयानं मिति च वैकुंठ प्राप्तिसाधतानुष्ठानानाबोदर्शितं ॥ उपनेष्यति प्रापयिष्यति

॥२८॥

मा॰हि॰ २६ देवेंद्रेण प्रेरितैरब्दैः रिरक्षिषुरित्यर्थः॥ अनघे अमरहिते। एकस्मिन्नेव करे सलीलं यथा तथा महीध्रं गोवर्द्धनं धर्त्ता धारयिष्यति उच्छि
लीध्रं उद्धृतं छत्राकमिव सप्तवर्षाणि वयो यस्य सः॥३२॥ निशि शरत्कौ निशाकररश्मिनिर्गौर्यां धवलायां वने क्रीडन् कलानि मं
जुलानि पदानि यस्मिन्। तद्वितत आयतं दीर्घं मूर्छितं आलापयुक्तं गीतं तेन उद्दीपितः॥ स्मरेण बहुकृपा सां तासां गोपीनां
हर्त्तुं शंखचूडस्य शिरो हरिष्यति॥३३॥ ये च प्रलंबादयः॥ सर्वे हरिणा हेतुना तेन तदीयं। अदर्शनं। अयोग्यं वैकुंठस्थलं

गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेऽभिवर्षति पशून् कृपया रिरक्षुः॥ धर्त्तोच्छिलीध्रमिव सप्तदिनानि
सप्तवर्षो महीध्रमनघैककरे सलीलं॥३२॥ क्रीडन्वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदा-
यतमूर्छितेन॥ उद्दीपितस्मररुजां व्रजभृद्वधूनां हर्त्तुर्हरिष्यति शिरो धनदानुगस्य॥३३॥ ये च प्रलंबखरा-
वे॰फ॰ दर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौंड्रकाद्याः॥ अन्ये च शाल्वकपिबल्वलदंतवक्त्रसप्तोक्षशंबरवि-
दूरथरुक्मिमुख्याः॥३४॥ ये वा मृधे समितिशालिन आत्तचापाः कांबोजमत्स्यकुरुकैकयसृंजयाद्याः
यास्यंत्यदर्शनमलं बलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयं॥३५॥ ॥ लिखितमिदं पुः ५६ ॥

यास्यंति अत्युत्तरेण। अन्वयः। खरो धेनुकः। दर्दुर इवदर्दुरो बकः इभः कुवलयापीडः कपिर्द्विविदः कुडोतरकः।३४। ये च मृधे आ-
त्तचापाः समितौ संग्रामे सालंते श्लाघ्यं ते समितिशालिनः ननु प्रलंबखरकापिबल्वलरुक्मप्रमुखाः बलचद्रेण निहताः। कांबोजाद-
चु यश्च भीमार्जुनादिभिः॥ शंबरः प्रद्युम्नेन। पवनो मुकुंदेन न तु हरिणा तत्राह॥ बलो भीमपार्थ इत्यादयः व्याजाह्वयाः नामपद
नामानि यस्य तेन सखो द्वारेण स्तुते न दमिताः। कालांतरे यास्यंतीति भावः। एतच्च सर्वं भविकर्म दिग्मात्रमितवचान्यथानंताकमि २६

व्यासावतारमाह ॥ अनुयुगं मीलितां संकुचितां धीर्येषां ॥ स्तोकमल्पमायुर्येषां स्वनिगमः स्वकृतो वेदराशिः वत अहो दू
रे पारं यस्य दुर्गमः इत्यवमृश्य सत्यामाविर्भूतः सन् स एव हरिः विटपशः शाखाभेदेन । ३६ । बुद्धावतारमाह । देवद्विषां दैत्यानां
निष्ठितानां नितरां स्थितानां तद्बलेन च यत्पूर्भिः पुरीभिः अदृश्यतूर्भिः अलक्ष्यवेगाभिर्निर्मिते विमोहे योगपतात्यागो यस्मात् मतेः ।
प्रलोभनश्च अयुक्तस्वीकारो यस्मात् ॥ तं पाखंडवेषं विधाय तेन । औपधर्म्यं पाखंडधर्मं स्वार्थे ष्यङ् बहु भाषितइत्यर्थः । ३७

कालेन मीलितधियामवमृश्य नृणां स्तोकायुषां स्वनिगमो वत दूरपारः ॥ आविर्हितस्त्वनुयुगं स हि सत्य
वत्यां वेदद्रुमं विटपशो विभजिष्यते स्म । ३६ देवद्विषां निगमवर्त्मनि निष्ठितानां ॥ पूर्भिर्मयेन विहिताभिरदृ
श्यतूर्भिः ॥ लोकान् घ्नतां मतिविमोहमतिप्रलोभं वेषं विधाय बहु भाष्यत औपधर्म्यं ॥ ३७ ॥ यर्ह्यालयेष्वपि
सतां न हरेः कथाः स्युः पाखंडिनो द्विजजना वृषला नृदेवाः ॥ स्वाहा स्वधा वषडिति स्म गिरो न यत्र शास्ता
भविष्यति कलेर्भगवान् युगांते ॥ ३८ ॥ सर्गे तपोहमृषयो नव ये प्रजेशाः स्थानेथ धर्ममखमन्वमरावनी
शाः अंते त्वधर्महरमन्युवशासुराद्या मायाविभूतय इमाः पुरुशक्तिभाजः । ३९ ॥ कल्क्यवतारमाह ॥ यर्हि यदा

सतामप्यालयेषु गृहेषु हरेः । कथाः न स्युः । त्रैवर्णिकाः । पाखंडिनः स्युः । वृषलाः शूद्रा राजानः ॥ स्युः स्वाहा स्वधा वषट् वाचो न स्युः
तदा कल्किरूपेण कलेः । शास्ता भविष्यति । अत्र चतुर्दशावतारसंवादात् प्रागुक्ता वराहादयः मन्वंतरावतारास्तु । सतानाविनो
च धन्वंतरिपरशुरामौ तदावर्तते ॥ श्रीरामादयस्तु नाविताः । तत्र तु कचिद्भूतादिनिर्देशः ॥ छांदस इति । इत्थं मत्स्यादिकार्य
भेदेन मायागुणावतारविभूतीराह ॥ सर्ग इति । स्थाने स्थितौ मखो विष्णुः धर्मश्च मखश्च मनवश्च अमराश्चावनीशाश्चांते

ना०टि०
३०

इदं संक्षेपेणोक्तं विस्तरेण वक्तुं न कोपि समर्थ इत्याह ।। विष्णोरिति । पृथिव्याः परमाणून् यो विममे गणितवान् तादृशोपि ।
कोनु विष्णोर्वीर्यगणनां कर्तुमर्हति ।। कथं न तस्य यो विष्णुः त्रिविक्रमः सत्यलोकं चस्कंभ धृतवान् ।। किमिति चस्कंभ यस्मात्
त्रिविक्रमेऽस्खलिताप्रतिघातभ्रमणेन स्वरंहसा स्वपादवेगेन त्रिसाम्यरूपं सदनमधिष्ठानं तस्मादारभ्य उरु अधिकं
कंपयानं कंपमानं कंपेन यानं यस्येति वा । अतः कारणाच्चस्कंभ आत्रिपृष्ठमिति छेदः ।। सत्यलोकमभिव्याप्य यः सर्वं धृत-
वानित्यर्थः । तथा च मंत्रः विष्णोर्नुकमिति ।। अस्यार्थः विष्णोर्नु कं वीर्याणि प्रवोचं कः । प्रावोचदित्यर्थः ।। यः पार्थिवानि रजां-

विष्णोर्नु वीर्यगणनां कतमोर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि । चस्कंभ यः स्वरंहसास्खलता त्रि-
पृष्ठं यस्मात्रिसाम्यसदनादुरुकंपयानं ।। ४० ।। नांतं विदाम्यहममी मुनयोग्रजास्ते मायाबलस्य पुरुषस्य कु-
तोपरे ये गायन् गुणान् दशशताननआदिदेवः । शेषोधुनापि समवस्यति नास्य पारं ।। ४१ ।। येषां स एव भग-
वान् दययेदनंतः सर्वात्मनाश्रितपदो यदि निर्व्यलीकं । ते दुस्तरामतितरंति च देवमायां नैषां ममाहमिति धी-
रश्वसृगालभक्ष्ये ।। ४२ ।।

पि स्वै विममे सोपि यो विष्णुः त्रेधा विचक्रमाणः त्रिविक्रमं कुर्वन् उत्तरलोकं अस्कंभयत् ।। अव-
ष्टब्धवान् ।। कथं तर्हि तस्य सधस्थं सहस्थस सधादेशः ति एतीस्याः तत्रस्थैर्देवैः सह वर्तमानमित्यर्थः ।। ४० ।। एतस्य पंचयति नांतमिति
परः पुरुषस्य मायाबलं तस्यांतं न विदाम्यहं न वेद्मि दशशतान्याननानि यस्य ।। सोपि अस्य गुणान् गायन् पारं न समवस्यति ।। न प्रा-
प्नोति ।। ४१ ।। यदि न केपि विदंति तर्हि कथं मुच्येरन् । तत्र तत्कृपयैवेत्याह ।। येषामिति दययेत् दयां कुर्यात् ।। ते च यदि निःकपटं आश्रि-
त्य चरणानवंति ।। ते एव दुरां देवमायां अतितरंति च कारान्मायावेजनं चाविदंति च । अथैतिया ः । अल्पद्रुममेव तेषां माया याति त

न
३०

अंतं ज्ञातानाभवेपि मायेयमिति ज्ञानं तत्कृपयावकृ नाम सीत्याह। वेदाहमिति त्रिभिः। यूयमिति सनकादीनां सर्वोप्यवकृत्वं दैत्यवर्यः
प्राह्लादः मनुः स्वायंभुवः तस्यपत्नीचशतरूपा तदात्मजाः प्रियव्रतादयः पुत्रौचकन्याप्राचीनबर्हिर्मोविसर्गलोपश्छांदसः। तथ
नुः।।अनुश्चसंधिरार्षः।।रंतिदेवाः। इति पाठः सुगमः। एकपद्येएते। सहितैर्देवव्रतेनामूर्त्तय ॰यः।।उपेंद्रदत्तः शुकः विभीष॰

वेदाहमंगपरमस्यहियोगमायांयूयंभवश्चभगवानथदैत्यवर्यः।।पत्नीःमनोःसचमनुश्चतदात्मजाश्च
प्राचीनबर्हिरृभुरंगउतध्रुवश्च।४३।।इक्ष्वाकुरैलमुचुकुंदविदेहगाधिरघ्वंबरीषसगरागयनाहुषाद्याः
मांधात्रलर्कशतधन्वनुरंतिदेवदेवव्रतोबलिरमूर्त्तरयोदिलीपः।।४४।।सौभर्युतंकशिबिदेवलपिप्पला
द्याः।।सारस्वतोद्धवपराशरभूरिषेणाः।।येन्येविभीषणहनूमदुपेंद्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेवव
र्याः।४५।।तेवैविदंत्यतितरंतिचदेवमायांस्त्रीशूद्रहूणशबराअपिपापजीवायद्यद्भुतक्रमपरायणशी
लशिक्षास्तिर्यग्जनाअपिकिमुश्रुतधारणाये।।४६।।

ता गाद्वयोर्वाचार्यमुख्याये षांते।४४। किंबहुना सत्संगेन सर्वेपि विदंतीत्याह।४५।।ते वाइति। अद्भुताः क्रमाः पादन्यासाय
स्यहरेस्तत्परायणास्तद्भक्ताः। ते षां शीलं शिक्षायेषां तेतथा यदि भवंति तर्हि तेपि विदंतीत्यर्थः। श्रुतेन भगवतो रूपे धारणा
मनोनियमनं येषां ते विदंती किमुवक्तव्यं।।४६।।

भा० द्वि० किंतद्भगवतः स्वरूपं यस्मिन्मनोधारणां विधाय मायां तरंतीत्यपेक्षायामाह। शश्वदिति द्वाभ्यां। यद्ब्रह्मेति विदुर्मुनयः तद्वै भगवतः स्व
३१ द रूपं किं तद्ब्रह्म तत्राह अजस्रं नित्यं च तत्सुखं च विशोकं चेति॥ अजस्रसुखत्वे हेतुः॥ शश्वत् सदा प्रशांतं अतो नित्यसुखरूपं विशोकत्वे हेतुः
नयं अभयं कुतः यतः समं भेदरहितं अतो न यद्द्वितीयाद्वै भवतीति श्रुतेः॥ तत्कुतः। यतः प्रतिबोधमात्रं ज्ञानैकरसं न तु ज्ञानस्यापि नीलपीताद्याका य
रेण चक्षुरादिकार्यभेदे न च भेदोस्य तेन शुद्धं निर्मलं ननु दर्शितो विषयकरणोपरागरूपो मलः इत्यत आह॥ सदसतः परं विषयकरणाभ्या
गम्यमानं वृत्तेरेव तदुपरागो न ज्ञानस्येति भावः। ननु तथापि ज्ञात्रा सह भेदः स्यात्। न आत्मतत्त्वं आत्मनो ज्ञातुः स्वरूपमेव तत न ततोपि भिन्नं ननु
चतं त्वौपनिषदं पृच्छामीति श्रुतेर्बोध्यत्वप्रतीतेः। कुतो बोधरूपत्वं तत्राह। शब्दो न यत्रेति। आरोपितनिवृत्त्यैव शब्दस्य व्यापारो न तद्बोध
क इत्यर्थः॥ ननु भवतु नाम निरस्तभेदं ज्ञानरूपत्वाद्विशोकत्वं सुखस्य तु नानाकारक क्रियाफलत्वं तत्कथं अजस्रसुखत्वं तस्येति अ

शश्वत्प्रशांतमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वं॥ शब्दो न यत्र पुरुकारकवान्क्रियार्थो माया परैत्यभि
मुखे च विलज्जमाना।४७। तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकं॥ सध्र्यङ् नियम्य यतयो य
ह। यत्र बहुकारकसाध्यक्रियार्थे उत्पाद्याप्यविकार्यसं मकर्तृहेतिं जह्युः स्वराडिव निपानखनित्रमिंद्रः।४८॥
स्कार्यरूपं चतुर्विधं क्रियाफलं च नास्ति। इंद्रियैर्ज्ञातांशानि व्यक्तिरिव क्रियानिरानंदांशानि व्यक्तिमात्रं क्रियते नोत्पत्त्यादिकमिति
भावः। ननु तथापि तावेपि मायामलाख्याकरणेन विकार्यत्वं स्यादेव ब्रीहीणामिव तुषाख्याकरणेन तत्राशंक्याह। माया परैत्यभिमुखे स्था
तुं विलज्जमानेव यस्मात् परैति दूरतो परैति तस्मादेवंभूते भगवति नियमितमनसां कृतार्थानां न किमपि कर्तव्यमस्तीत्याह॥ सहाचती
ति सध्र्यङ् सहचरं मनो यत्प्रतिनियम्य यस्मिन् स्थिरीकृत्य यतंते। पतयः पत्रशीलाः। कर्तृभेदः। तन्निरासो कर्तृः। तच्च हेतिसाधनं जह्युः
त्यजेयुः। अतु प्रयोगात्तुल्यादिपत इत्यर्थः। उपयोगाभावेन साधनानादरे दृष्टांतः निपीयते स्मिन्निति निपानं कूपः। तस्य खनित्रं खननसाध
नं यथा स्वराट् स्वयमेव पर्यन्यरूपेण विराजमानः इंद्रो नादत्ते न त्यजति यद्वा॥ स्वेनैव राजते इति स्वराट् दरिद्रः सध्र्याइंद्रः। समद्वयः सनकाम्मेका देहदशायां गृहीतं निपानखनित्रं जहाति तद्वदित्यर्थः॥४८॥ ३१

एवंतावद्दुःखसुखंविशोकंतुरीयंभगवतःस्वरूपंतत्साधनानांचनप्राप्यंवाकिंचिदस्तीत्युक्तंइदानींततःप्राक्सएवसर्वकर्म
प्रवर्त्तकश्चेत्याह ॥ सएवश्रेयसांफलानांविभुः दातापितत्रहेतुः भावानांब्राह्मणादीनांस्वभावैः शमदमादिभिः विशेषेणोपि
स हितस्यततः प्रवृत्तस्यकर्मणोयतः ॥ प्रवर्त्तकात्प्रसिद्धिः ॥ यद्वाभावानांमहदादीनांस्वभावेनपरिणामेनविहितस्यसतः कार्य
स्यप्रसिद्धिः सत्तादैश्वर्यादीनांदातेत्यर्थः ॥ ननुकर्मकर्तुर्मृतकस्यकथंस्वर्गादिफलंस्यात्तत्राह । स्वारंभकारणधातूनांवि
गमेवियोगेसति ॥ अनुविशीर्यमानेपिदेहेतत्रस्थव्योमेवयः । तेनसहविशीर्यतोयतः । अजः तेनसहनजातः । तस्यपुरु

सश्रेयसामपिविभुर्भगवान्यतोस्यभावस्वभावविहितस्यसतःप्रसिद्धिः ॥ देहेस्वधातुविगमेनुविशीर्यमाणे
व्योमेवतत्रपुरुषोनविशीर्यतेजः ४९ ॥ सोहंतेभिहितस्तातभगवान्विश्वभावनः ॥ समासेनहरेर्नान्यदन्यस्मा
त्सदसच्चयत् ५० ॥ इदंभागवतंनामयन्मेभगवतोदितं ॥ संग्रहोयंविभूतीनांत्वमेतद्विपुलीकुरु ५१ ॥ य
थाहरौभगवतिनृणांभक्तिर्भविष्यति ॥ सर्वात्मन्यखिलाधारेइतिसंकल्प्यवर्णय ५२ ॥ मायांवर्णयतोमु
ष्यईश्वरस्यानुमोदतः ॥ शृण्वतःश्रद्धयानित्यंमाययात्मानमुह्यति ५३ ॥ इतिश्रीभागवतेमहापुराणेद्वि
तीयस्कंधेब्रह्मनारदसंवादेसप्तमोध्यायः ॥ ७ ॥

षस्यश्रेयसांप्रभुरित्यर्थः ४९ । अध्यायत्रयस्यार्थमुपसंहरति
सोयंतेतुभ्यंसमासेनसंक्षेपेणाभिहितः तदेवाह । सदसत्कार्यकारणंचहरेरन्यन्नभवति । नतुहरेस्तद्व्यतिरेकेनततकृतविकार
प्रसंगःस्यात् तं अन्यस्मात्कारणान्नततोहरिः । कार्याव्यतिरिक्तइत्यर्थः ५० । अयंचविभूतीनांसंग्रहउदितःउक्तः ५१ । यथाव
र्णितेननृणांभक्तिर्भविष्यतीत्येवंसंकल्प्यसंचिंत्यतथाहरिलीलाप्राधान्येनश्रीभागवतंवर्णयनतुभक्तिरसविद्यातेनकेवलंतत्वमि

परी

अथ मेकुंस संवंधमाक्षिपन्नीगातीवयोः ॥ वक्ष्यन्नेदित्वा श्री परीक्षित पुराणार्थानवबुभुत्सितान् ॥१॥ तमेतद्विपुलीकुर्वित्युक्तं तदेव वि-
पुलीकरणं एकुति ब्रह्मणेति त्रिभिः अगुणस्य गुणातीतस्यापि देवदर्शनस्य सः ॥२॥ लोकानां यावन्तः रूपाः ॥ निःसंगमन-
नाः श्रीकृष्णे निवेश्येति ॥ स्वप्रपन्नो दर्शितः ॥३॥ सोपि श्रद्धया श्र एवतो नाव तुपक इत्याह ॥ श्र एवत इति ॥ स्वप्रपन्नं विनापि
भगवान स्वयमेव हृदि विशति ॥४॥ भावसरोरुहं हृदयकमलं प्रविष्टः सन् मकृतं सर्वं मलं धुनोति ॥ सलिलस्येति ॥ दृष्टांतरव्या-

श्रीराजोवाच ॥ ब्रह्मणाचोदितोब्रह्मन गुणाख्यानेगुणस्यच ॥ यस्मैयस्मैयथाप्राहनारदोदेवदर्शनः ॥१॥ एत-
द्वेदितुमिच्छामितत्वंवेदविदांवर ॥२॥ हरेरद्भुतवीर्यस्यकथालोकसुमंगलाः ॥ कथयस्वमहाभागयथाहमखि-
लात्मनि ॥ कृष्णेनिवेश्यनिःसंगंमनस्त्यक्ष्येकलेवरं ॥३॥ श्रृएवतःश्रद्धयानित्यंगृणतश्चस्वचेष्टितं ॥ काले-
ननातिदीर्घेणभगवान्विशतेहृदि ॥४॥ प्रविष्टकर्णरंध्रेणस्वानांभावसरोरुहं ॥ धुनोतिशमलंकृष्णःस-
लिलस्ययथाशरत् ॥५॥ धौतात्मापुरुषःकृष्णपादमूलंनमुंचति ॥ मुक्तसर्वपरिक्लेशःपंथःस्वशरणंयथा ॥६॥

मिश्रणादिना कुंभस्थे जले शोधिते तदेव केवलं शुध्यति ॥ न तु दीर्घतडागादिगतं स च मलः कुंभस्थं तत्रैव तिष्ठत्येव ॥ न तु सर्वथा
विलीयते ॥ अतएव किंचिच्चलने पुनः स्फुरति च ॥ यतवो दानादि प्रायश्चित्तं न समर्थ्या सर्वेषां सर्वपापं धुनोति किंतु सावशेषो-
ष्यं तत्रुकस्य चितकिं चिदेवाहृदि प्रविष्टमात्रस्तु श्रीकृष्णस्तु सर्वेषां सर्वपापनिःशेषहरंती त्यनेन दृष्टांते नोक्तं शरत्सलिलस्य मलो
यथा शरत् ॥५॥ ततश्च कृतार्थो भवतीत्याह ॥ धौतात्मा निःपापः मुक्तासर्वे रागद्वेषादयः परिक्लेशा येन ॥ पांथः प्रवासादागतः
स्वशरणं गृहं यथा न मुंचति तद्वत् ॥६॥

तदेव श्रवणौत्सुक्यमाविष्कृत्य संदिग्धान् यान् पृच्छति ॥ अधातुमतः धातवोऽन्नानि तत्संबंधस्यान्यस्यास्य लौकिकस्यात्मनः

प धातुनिर्देहारंभ इतीयत एतत् किं इच्छया निर्निमित्तहेतुना वा अस्मदादिवत् कर्मादिना भवंतो यावद्ज्ञानं ते अतः कथयंति

ति शेषः ॥ ७ ॥ यश्चासावीश्वरः । सोऽपि तत्तुल्यदेहवान् प्रोक्तः अतस्तस्य को विशेष इत्याशयेन पृच्छति ॥ आसीदिति सार्द्धेन

लोकानां संस्थानं रचना तदेव लक्षणं स्वरूपं यस्य तत्पद्मं यस्योदरादासीत् । आसावीश्वरः । इयत्ताङ्गैः स्वपरमितैरवयवैः

लौकिकः पुरुषो यावान् यत्संख्याकावयवयुक्तः । तावान् प्रोक्तः संस्थावान् अवयवानिव प्रोक्तः । अतः को विशेषस्तस्येति ॥ ८ ॥

यद् धातुमतो ब्रह्मन् देहारंभोऽस्य धातुभिः ॥ यदृच्छया हेतुना वा भवंतो जानते यथा ॥ ७ ॥ आसीद्यदुदरात् पद्मं लोक

संस्थानलक्षणं ॥ यावानयं वै पुरुष इयत्तावयवैः पृथक् ॥ तावानसाविति प्रोक्तः संस्थावयववानिव ॥ ८ ॥ अ

जः सृजति भूतानि भूतात्मा यदनुग्रहात् ॥ ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः ॥ ९ ॥ स चापि यत्र पुरुषो वि

श्वस्थित्युद्भवाप्ययः ॥ मुक्त्वात्ममायां मायेशः शेते सर्वगुहाशयः ॥ १० ॥ पुरुषावयवैर्लोकाः सपालाः पूर्व

कल्पिताः लोकैरमुष्यावयवाः सपालैरिति शुश्रुम ॥ ११ ॥

अवयवं च विशेषो वाच्य इत्याह ॥ अजो भूतात्मा तानां प्रवृत्त

याधीना आत्मा नियंता यस्य समष्ट्युपाधित्वात् ॥ येन च अनुगृहीता तस्य रूपं ददृशे दृष्टवान् ॥ एतच्च तस्यापि द्रष्टृशोऽस्य कूटस्थ

स्याखिलात्मनः । सत्यं सृजामि सृष्टोऽहमीक्ष्ययैवाभिचोदितः ॥ इत्यादिनोक्तमनूद्यते । अगुणस्य संविधाति ॥ ९ ॥ प्रश्नांतरमा

ह । स चापीति यत्र शेते येन रूपेणावति रक्षति विश्वस्य स्थित्यादयो यस्मात् एवमादि प्रश्नात् तांस्तत्त्वतोऽहं श्रुदाहर्तुमिति सर्वक्रियायाः

संबंधः ॥ १० ॥ प्रश्नांतरमाह । पुरुषस्यावयवैः पूर्वं कल्पिता यस्येहावयवैर्लोकान् कल्पयंतीत्यादौ लोकैश्चामुष्यावयवा इति पा

तदिदं ॥ २१ ॥ वे

भा० द्वि०
३३

एवं संदेहविपर्ययाभ्यां पृष्टं इदानीमज्ञातान् बहूनर्थान् पृच्छति ॥ यावानित्यादिना । कल्पो महान् विकल्पो वांतरः । भूतादिशब्दो
यस्मात् । यस्य वाचक इति वा सतः स्थूलदेहाभिमानिनो मनुष्यपितृदेवादेः आयुषः प्रमाणं अनुमानप्रकार एषः । विशेषं पृ
च्छति कालस्येति । अनुगतिः प्रवृत्तिः । कर्मगतयः । कर्मप्राप्यानि स्थानानि यादृशीः ॥ यादृग्रूपः ।१२॥ गुणानां सत्वादीनां परि
णामं देवादिरूपं इच्छतां ॥ गुणिनां जीवानां मध्ये । यस्मिन् परिणामे कर्मणां पुण्यपापानां समावायः ॥ समुदायः केन क

यावान् कल्पो विकल्पो वा यथा कालोनुमीयते ॥ भूतभव्यभवच्छब्दः आयुर्मानं च यत्सतः ॥१२॥ कालस्यानुग
तिर्या तु लक्ष्यतेण्वी बृहत्यपि ॥ यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम ।१३॥ यस्मिन् कर्मसमावायो य
थायेनोपगृह्यते ॥ गुणानां गुणिनां चैव परिणाममभीप्सतां ॥१४॥ भूपातालककुब्व्योमग्रहनक्षत्रभू
भृतां ॥ सरित्समुद्रद्वीपानां संभवश्चैतदोकसां ॥१५॥ प्रमाणमंडकोशस्य बाह्याभ्यंतररंध्रतः ॥ महतां चानुचरि
तं वर्णाश्रमविनिश्चयः ॥१६॥ अवतारानुचरितं यदाश्चर्यतमं हरेः ॥ युगानि युगमानं च धर्मो यश्च युगे यु
गे ॥१७॥ नृणां साधारणो धर्मः सविशेषश्च यादृशः । श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवतां ।१८॥

र्मसमुदायेन कथं कृतेन कोधिकारी देवादिभावं प्राप्नोतीत्यर्थः ॥ भूरादीनां संभवः । एतानि ओकांसि येषां प्राणिनां तेषां च
संभवः । यथेति सर्वत्रानुषंगः । १५। वर्णानामाश्रमाणां च विनिश्चयः । तत्तद्भावेन निर्धारः ॥१६॥ युगे युगे इति युगं बोध
र्मः ॥ यश्च हरेरवतारानुचरितं ।१६॥ सविशेषो वर्णाश्रमनिबंधनः । श्रेणीनां तत्तद्व्यवसायोपजीविनां व्यवहाराय लक्ष
णो धर्मः । राजर्षीणां प्रजापालिनाधिकारिणां कृच्छ्रेषु आपत्सु जीवतां सर्वेषां ।१८॥ ३३

सर्वेषां तत्त्वानां प्रकृत्यादीनां परिसंख्यानं संख्या लक्षणं तत्कार्यं हेतुत्वेन च लक्षणमित्यर्थः ॥ पुरुषाराधनस्य विधिः देवपूजाप्रकारः
अष्टांगयोगस्य च विधिः ॥१९॥ योगेश्वराणामैश्वर्यं अणिमादिना ॥ अर्चिरादिगतिः ॥ लिंगशरीरस्य भंगः ॥ प्रलयः कैवल्यं ॥ वेदा ऋ
ग्वेदादयः ॥ उपवेदा आयुर्वेदादयः धर्माः धर्मशास्त्राणि तेषां इतिहासपुराणयोश्च गतिः संप्लवः स्वरूपं ॥२०॥ अवांतरप्रलयः
यद्वा समस्तकृत्स्नं वस्तु उद्भवः विक्रमः स्थितिः ॥ प्रतिसंक्रमो महाप्रलयः ॥ इष्टं वैदिकं कर्म पूर्तं स्मार्तं वापीकूपतडागादि देवता
पतनानि च ॥ अन्नप्रदानं आरामः ॥ पूर्तमित्यभिधीयत इति ॥ तत्र च काम्यानामग्निहोत्रादीनां विधिः ॥ अविरोधप्रकारः ॥२१॥

तत्त्वानां परिसंख्यानं लक्षणं हेतुलक्षणं ॥ पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च ॥१९॥ योगेश्वरैश्वर्यग
तिर्लिंगभंगस्तु योगिनां ॥ वेदोपवेदधर्माणामितिहासपुराणयोः ॥२०॥ संप्लवः सर्वभूतानां विक्रमः प्रतिसं
क्रमः ॥ इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः ॥२१॥ यश्चानुशायिनां सर्गः पाखंडस्य च संभवः ॥ आत्मनो बं
धमोक्षौ च व्यवस्थानं स्वरूपतः ॥२२॥ यथात्मतंत्रो भगवान् विक्रीडत्यात्ममायया ॥ विसृज्य वा यथा मायामुदास्ते
साक्षिवद्विभुः ॥२३॥ सर्वमेतच्च भगवान् पृच्छते मेऽनुपूर्वशः तत्त्वतोऽर्हस्युदाहर्तुं प्रपन्नाय महामुने ॥२४॥ अत्र
प्रमाणं हि भवान् परमेष्ठी यथात्मभूः ॥ परे चेहानुतिष्ठंति पूर्वेषां पूर्वजैः कृतं ॥२५॥ न मेऽसवः परायंति ब्रह्म
न्ननशनादमी ॥ पिबतोऽच्युतपीयूषमन्यत्र कुपिताद्द्विजात् ॥२६॥

अनुशायिनां लीनोपाधीनां जीवानां ॥ ततो जीवस्य व्यव
स्थानं बंधमोक्षयोर्व्यतिरेकः ॥ स्वरूपेणावस्थानं ॥२२॥ उदास्ते प्रलये ॥२३॥ यद्वा व्याप्तुमपि ॥ प्रमाणं सम्यक् ज्ञाता यतस्त्वं ब्रह्मनारद
व्यासक्रमेण संप्रदायोऽस्तीति सामान्यन्यायेनाह ॥ परे चेति यद्वा सदन्ये प्रायशो गतानुगतिका एव न तत्त्वविद इत्याह परे चेति ॥२५

भा० द्वि० ३४ न तु कथानन्तरं हि उक्तोयाप्यौं कुलस्य कुतः अवशांतत्राह नेति अन्यत्र तु परायं तितामपगच्छंति। तथा कुलीनत्वं तात्पर्यं । अच्युतकी-
र्तिपीयूषं पिबतः २६ उपमंत्रितः पृष्टः संस्थासौ मृतिश्च सतां पतिर्वा २७ तस्य बुद्धकल्पे स्रष्टुः उपक्रमकाले २८ भागवता-
ख्यानं तु ब्रह्मणे न मुक्तं तदा तु सुपक्रांतवानित्याह ॥ पांडुनामृषभः श्रेष्ठः आनुपूर्व्येणेति प्रस्तावक्रमोल्लंघेन वक्तृतः नतु अक्रम-
२९ द्वितीये अष्टमः ८ ॥ ताऽयं श्रोत्ररंचकुं ब्रह्मणे हरिणोदितं ॥ कथयामास तत्र मे शुको भागवतं पुनः । १ । तत्र यत्पृष्टं बु-
क्तं यद्धातुमतः इत्यनेन जीवस्य कथं देहसंबंध इति तत्रोत्तरमाह ॥ आत्मनो हरेरा अनुभवरूपस्यात्मनः अर्थेन तत्सेन देहादि-
ना संबंधो उत्सातत्वतो न घटेत अत्र हेतुः परस्येति स्वप्नदृष्टुः ॥ यथा स्वप्नद्रष्टुर्देहसंबंधो न घटते तेन दृत । तस्मात्संसारो मायैवे-

सूत उवाच ॥ स उपामंत्रितो राज्ञा कथायामिति सत्पतेः ॥ ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि २७ ॥ प्राह
भागवतं नाम पुराणं ब्रह्मसम्मितं ॥ ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते । २८ ॥ यद्यत्परीक्षिदृषभः पांडूनाम-
नुपृच्छति ॥ आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे २९ ॥ इति श्री द्वितीयस्कंधे प्रश्नविधिर्नामाष्टमोऽध्या-
यः ॥ ८ ॥ श्रीशुक उवाच ॥ आत्ममायामृते राजन्परस्यानुभवात्मनः नघटेतार्थसंबंधः स्वप्नद्रष्टुरिवांजसा
। १ ॥ बहुरूप इवाभाति मायया बहुरूपया । रममाणो गुणेष्वस्य ममाहमिति मन्यते । २ ॥ यर्हि वाव महिम्नि स्वे
परस्मिन्कालमाययोः ॥ रमेत गतसंमोहः त्यक्त्वोदास्ते तदोभयं । ३ ॥ स्यात् । बहुरूपः बालत्वादिरूपो देवतादिरू-
पश्च आभाति गुणेषु देहादिषु । अत एव तत्क्रियोगेन तन्निरासे सति मोक्षोपि घटत इत्याह ॥ यर्हीति वाव शब्दावधार्ये । स्व एव महि-
म्नि यदा रमेत तदैवाह । कालमाययोः पुरुषप्रकृत्योः । परस्मिन् तदा उभयं अहं ममेति च त्यक्त्वा उदास्ते पूर्णस्वरूपेणावतिष्ठ-
ते ॥ तदुक्तं यया संमोहितो जीव आत्मानं त्रिगुणात्मकं परोपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते । अनर्थोपशमं साक्षात् भक्तियोगम

स्मितासंहितानास: व कें: सावकोतालानाकमलालिङ्ि

यद्योक्तं परमेश्वरस्यापि देहसंबंधाविशेषात् कथं तद्भक्त्या मोक्षः स्यादिति। आसीत् तदुदरात् पद्ममित्यादिना तत्राह॥ आत्मनो जीवस्य तत्त्वविशुद्ध्यर्थं तद्भवत्येव किं तत् यत्तपआदिना लब्धं भगवान् ब्रह्मणे आह॥ किं कुर्वन् ऋतं सत्यं चिद्घनं रूपं दर्शयन् दर्शने अव्यलीकेन तपसा दृतः। सेवितः सन् अयं भावः जीवस्याविद्यया मिथ्यारूपदेहसंबंधः ईश्वरस्य तु योगमायया चिद्घनलीलाविग्रहाविर्भाव इति महान् विशेषः॥ अतस्तद्भजनान्मोक्षोपपत्तिरिति॥ ४॥ भगवद्भजनादेव तत्त्वज्ञानमित्येतत् प्रपंचयिष्यन्। ब्रह्मणोपि तत्त्वज्ञानं तत्प्रसादादेवेति॥ दर्शयितुमितिहासमाह। स इत्यादिना। परो गुरुः। तत्किरहस्य पदे स्वास्वधिष्ण्यं पद्मं आस्थाय अधिष्ठाय॥ तस्य अधि-

आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतं॥ ब्रह्मणे दर्शयन् रूपमव्यलीकव्रतादृतः॥ ४॥ स आदिदेवो जगतां परो ६
गुरुः॥ स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत॥ तां नाध्यगच्छद्दृशमत्र संमतां प्रपंचनिर्माणविधिर्यया भवेत्॥ ५॥
स चिंतयन् द्व्यक्षरमेकदांभस्युपाश्रृणोत् द्विर्गदितं वचो विभुः॥ स्पर्शेषु यत् षोडशमेकविंशं निःकिंचनानां।
ग नृप यद्धनं विदुः ६॥

स्वान्ते प्रलयपयोधिजले निमग्नः। परावृत्य स्वधिष्ण्ये स्थित्वेत्यर्थः॥ ए… तत्कथं स्रक्ष्यामीत्यालोचितवान् तां दृशं प्रज्ञां च सृष्टिविषये संमतां अव्यभिचारिणीं विधिः प्रकारः॥ ५॥ स चिंतयन् कदाचिद्द्व्यक्षरं वचः। अंभसि उपाश्रृणोत्। समीपे श्रुतवान् ते अक्षरे दर्शयति कादयो मावसानाः स्पर्शाः॥ तेषु यत् षोडशं तकारः॥ यच्चैकविंशं पकारः॥ नपुंसकत्वं वचसो निर्देशार्थं तदर्थमाह। हे नृप निःकिंचनानां त्यक्तधनानां धनं यद्विदुः। यतस्तपोधना इति प्रसिद्धाः॥ तच्च द्विर्गदितं तप तपेति लोपे मध्यमपुरुषैकवचनांतस्य वीप्सां सादरविधिरूपामश्रृणोदित्यर्थः॥ ६॥

भा०द्वि० एवं निशम्य तत्स्य वचः सो वक्तुर्दिदृक्षया ततः प्रचलितः सन्दिशो विलोक्य पुनः स्वधिष्ण्यमास्थाय केनचिल्लत्यक्तेतियुक्त इव तच्चा
३५ त्मनोहितं विमृश्य पतयसि मनो धृतवानित्यर्थः ॥७॥ ततस्य सः अखिलानां लोकानां तापनं प्रकाशकं तपः अतप्यत कृतवान् तपतत्
पतपेत्येतस्य वचसोर्थः अमोघदर्शनं यस्य जितः अनिलः आत्मा मनश्च येन विजितानि उभयेंद्रियाणि ज्ञानकर्मात्मकानि येन
तपसां तपस्वितृ पञ्चरतां मध्ये तपीयान् अतिशयेन तपस्वी ॥८॥ तस्मै ब्रह्मणे स्वलोकं वैकुंठाख्यं परं श्रेष्ठं न यत्परं यत य
तः परमुत्कृष्टं अन्यन्नास्ति । तमेव लोकमनुवर्णयति पंचभिः व्यपेताः संक्लेशादयो यस्मात् दृष्टवद्भिः सत्पुरुषवद्भिः यद्वा स्व

श्लो निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः ॥ स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इ
वादधे मनः ॥७॥ दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेंद्रियः ॥ अतप्यत स्माखिललोक
ता तापनं तपस्तपीयान् तपतां समाहितः ॥८॥ तस्मै स्वलोकं भगवान् सभाजितः संदर्शयामास परं न यत्परं ॥ व्य
पेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतं ॥९॥ प्रवर्त्तते यत्र रजस्तमस्तयोः ॥ सत्वं च मिश्रं न
च कालविक्रमः ॥ न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः ॥१०॥ श्यामावदाताः शतपत्रलो
चनाः पिशंगवस्त्राः सुरुचः सुपेशसः ॥ सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः ॥११॥

स्वदृष्टं ज्ञानमस्ति येषां तैः आत्मवद्भिरित्यर्थः ॥९॥ तास्यां मिश्रं सत्वं च न प्रवर्त्तते किंतु शुद्धमेव सत्वं । कालविक्रमो नाशः । अपरे
लोभादयो न संतीति ॥ किमुत वक्तव्यं अनुव्रताः पार्षदाः ॥१०॥ श्यामाः श्वेते अवदाता उज्ज्वलाश्च । पद्मनेत्राः । पीतांबराः सु
रुचः अतिकमनीयाः । सुपेशसः । अतिसुकुमाराः । उन्मिषंत इव ज्वलंतो मणिप्रवेकाः उत्कृष्टमणयो येषु तानि निष्कानि प ३५

प्रवालादिवत् च्छवर्णो येषां परिस्फुरंति कुंडलानि मौलयो मालाश्च संति येषां ते ॥११॥ पार्षदानश्च तु वर्णयं पुनरपि लोकमनुवर्णयति
भ्राजिष्णुभिर्दीप्यमानाभिः तत्र विद्युत इव स्त्रियः ॥ अभ्रैर्नभ इव विमानानि तत्र इव लोकः ॥१२॥ श्रीः संपत् रूपिणी मूर्तिमती ॥ मा
नं पद्मं बिभ्रती तिमिर्नानाविलासैः ॥ यं स्वआंदोलं संश्रिता कुसुमाकरो वसंत तस्यानुगाः भ्रमराः ते र्विविधं गायमानं श्रयं तु प्रियस्य हरेः

प्रवालवैडूर्यमृणालवर्चसः परिस्फुरत्कुंडलमौलिमालिनः ॥११॥ भ्राजिष्णुभिर्यः परितः विराजते लसद्विमा
नावलिभिर्महात्मनां विद्योतमानः प्रमदोत्तमाद्युभिः ॥ सविद्युदभ्रावलिभिर्यथा नभः ॥१२॥ श्रीर्यत्र रूपिण्युरु
गायपादयोः ॥ करोति मानं बहुधा विभूतिभिः ॥ प्रेंखं श्रिता या कुसुमाकरानुगैर्विगीयमाना प्रियकर्म गाय
ती ॥१३॥ ददर्श तत्राखिलसात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिं ॥ सुनंदनंदप्रबलार्हणादिभिः ॥ स्वपा
र्षदमुख्यैः परिसेवितं विभुं ॥१४॥ भृत्यप्रसादाभिमुखं दृगासवं प्रसन्नहासारुणलोचनाननं ॥ किरीटिनं
कुंडलिनं चतुर्भुजं पीतांबरं वक्षसि लक्षितं श्रिया ॥१५॥ अध्यर्हणीयासनमास्थितं परं वृतं चतुःषोडशपंच
शक्तिभिः ॥१६॥

कर्म गायंती भवति ॥१३॥ य एवं ततो लोकः तत्र तस्मिन् ॥१४॥ भृत्यानां प्रसादे अभिमुखं दृगेव आसवः दृष्णां हर्षकारी यस्य तं ॥ प्रस
न्नहासमरुणलोचनं आननं यस्य ॥ वक्षसि स्थितया श्रिया लक्षितं अलंकृतमित्यर्थः ॥१५॥ अध्यर्हणीयं वरिष्ठं सिंहासनं चतस्रः प्रकृति
पुरुषमहदहंकाररूपाः षोडश एकादशेंद्रियमहाभूताख्याः पंचतन्मात्ररूपायाः शक्तयस्ताभिर्वृतं ॥१६॥

भा० द्वि०
३६ म

स्वाभाविकैः स्वैर्गुणैः ऐश्वर्यादिभिः । इतरत्र योगिषु अध्रुवैः । आगंतुकैः असाधारणैरित्यर्थः ॥ एवं सत्यपि स्व एव धामन स्वरूपरा-
वृं रमाणं अतएव ईश्वरं ॥ १६ ॥ तस्य दर्शनेन यः आह्लादः । तेन परिप्लुतं व्याप्तं अंतरं मनः करणं यस्य ॥ हृष्यंती रोमांचिता तनुर्यस्य प्रेम
भरेण अश्रुपूरिणी लोचने यस्य विश्वसृक् ब्रह्मा पारमहंस्येन यथा ज्ञानमार्गेण ॥ १७ ॥ तं ब्रु॰णं नु गवान् बभाषे प्रजाविसर्गे कार्ये नि- ला
जशासनार्हणं स्वनियोगार्हं प्रजाविसर्गे समुपस्थितमिति वान्वयः । ईषत्स्मितेन रोचिर्दीप्तिः । शोभा यस्याः तया गिरा ॥ १८ ॥ सिसृक्षया

युक्तं गुणैः स्वैरितरत्र चाध्रुवैः स्व एव धामन् रममाणमीश्वरं ॥ तद्दर्शनाह्लादपरिप्लुतांतरो हृष्यत्तनुः प्रेमभराः
श्रुलोचनः ॥ १७ ॥ ननाम पादांबुजमस्य विश्वसृक् यत्पारमहंस्येन पथाधिगम्यते ॥ तं प्रीयमाणं समुपस्थितं तदा
प्रजाविसर्गे निजशासनार्हणं ॥ १८ ॥ बभाष ईषत्स्मितरोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन् ॥ १८ ॥ श्रीभग-
वानुवाच ॥ त्वयाहं तोषितः सम्यक् वेदगर्भ सिसृक्षया ॥ चिरं भृतेन तपसा दुस्तोषः कूटयोगिनां ॥ १९ ॥ वरं वरय भद्रं ते
वरेशं माभिवांछितं ॥ ब्रह्मन् श्रेयःपरिश्रमः पुंसां मद्दर्शनावधिः ॥ २० ॥ मनीषितानुभावोयं मम लोकावलोकनं
यदुपश्रुत्य रहसि चकर्थ परमं तपः ॥ २१ ॥

हेतुना चिरं संभृतेन तपसाहं सम्यक् तोषितः दुस्तोषः तोषयितुं अशक्यः ॥ १९ ॥ मा इति मां
श्रेयसां फलानां परिश्रमः साधनप्रयासः । मम दर्शनमवधिर्यस्य स तथा अतोऽधिकं श्रमफलं नास्तीत्यर्थः ॥ २० ॥ एतच्च मत्कृपयैव त्वया
प्राप्तमित्याह ॥ मनीषितमिच्छा तुभ्यमिदं दातव्यमिति । या मम इच्छा तस्या अनुभावोयं कोसौ तमाह ॥ मम लोकस्यावलोकनं यत मत्वेदं ममै
व तपोबलेन प्राप्तमिति म्वा तं अं मन्यस्व तस्य वृत्तेरपि मत्कृतत्वादित्याह ॥ रहसि तप तपेति यद्वच उपश्रुत्य परमं तपश्च कर्थ कृतवान-
सि ॥ २१ ॥ ३६

तदपि त्वां प्रति मयैवादिष्टं करोतु तत्र तदा स्वधारं नेत्वपिकर्मणि कार्ये विमोहिते सति किं च तपो नाम ममैव शक्तिरित्याह ॥ तपो मे हृदयं अंत मि
रंगा शक्तिः ॥ आत्मा स्वरूपं यस्य ज्ञानमयं तपस्तु प्रसूतेः ॥ २२ ॥ ग्रासमि संहरामि बिभर्मि पालयामि वीर्यं शक्तिः ॥ २३ ॥ अध्यक्षः अधिष्ठा
ता योगुहायां बुद्धाववस्थितः ॥ यद्यपि वेद तथापीत्युत्तरेणान्वयः ॥ २४ ॥ नाथमानस्य याचमानस्य ॥ उतथ्य मानस्येति वा हे नाथ नाथ
यः ॥ आसंज्ञायः प्रयछेत्यर्थः ॥ नाथितं याचितं नाथनाध्यायाच्ञोपतापैश्वर्याशीःषु नाथितमेवाह ॥ परं सूक्ष्मं अवरं स्थूलं च ते रूपं

ध्यात्वा दिष्टं मयातत्रत्वपिकर्मविमोहिते ॥ तपो मे हृदयं साक्षात् आत्माहं तपसोनघ ॥ २२ ॥ सृजामि तपसैवेदं
ग्रसामि तपसा पुनः बिभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः ॥ २३ ॥ ब्रह्मोवाच ॥ भगवान् सर्वभूतानामध्यक्षो
वस्थितो गुहां ॥ वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितं ॥ २४ ॥ तथापि नाथमानस्य नाथ नाथय नाथितं ॥ परावरे
यथा रूपे जानीयां ते त्वरूपिणः ॥ २५ ॥ यथात्ममायायोगेन नानाशक्त्युपबृंहितं ॥ विलुंपन् विसृजन् गृह्णन्
बिभ्रदात्मानमात्मना ॥ क्रीडस्यमोघसंकल्पः ऊर्णनाभिर्यथोर्णुते ॥ तथा तद्विषयां धेहि मनीषां मयि माधव ॥ २
७ ॥ भगवच्छिक्षितमहं करवाणि ह्यतंद्रितः ॥ नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात् ॥ २८ ॥

यथा जानीयां २५ यथा च त्वं क्रीडसि तथा तद्विषयां मनीषां मयि धेहीत्युत्तरेणान्वयः नानाशक्त्युपबृंहितं विश्वं विलुंपन् संहर
न् विध्वंसयन् विसृजन् पालयन् आत्मना स्वयमेव आत्मानं ब्रह्मादिरूपं गृह्णन् क्रीडसि २६ ऊर्णुते तंतूनि आत्मानमाच्छाद
यसि २७ तत्किं सर्वे स्वेच्छया चरंतः त्वज्ञानं प्रार्थयसे तत्राह भगवत्त्वया शिक्षितं अनुतिष्ठ अतंद्रितः अनलसः सन् करिष्यामि
तर्हि किमनेन तत्राह यस्मादेवं तत तानवानुग्रहात् प्रजासर्गमीहमानः कुर्वन्नपि अहंकारादिना बध्येयमिति २८

न

अविस्पंच मदोऽनविता ॥ सतु कंचित्कालं मानदिति आर्घ्ये यते यावदिति नोऽईश्वातेत्वयालौकिकस्य सख्युः सखेवाहं कृतः करस्पर्शना
दिना ममत्वेन संभावितः । सन प्रज्ञासर्गरूपेतव परिकर्मणि सेवायां स्थितो विक्लवो व्याकुलः ॥ एवं यावज्ज्ञानं विन्दामि । उत्तममाः
धामादिनेदेन सज्जामितावत् । त्वत्समादहमप्यजः स्वतंत्र इति मानिनो मे समुन्नद्धः ॥ उत्कटो मादो मानं तत्र यद्वा मदो मासमुन्नद्ध
तामुद्रिक्तो न भवेदित्यर्थः ॥ २९ ॥ ज्ञानं शास्त्रोक्तं विज्ञानमनुभवः रहस्यं भक्तिः । सुगोप्यमनिवक्ष्यामीति निर्दिशात ॥ तदंगं तः

यावत्सखा सख्युरिवेश ते कृतः प्रजाविसर्गे विभजामि नो जनं ॥ अविक्लवस्ते परिकर्मणि स्थितो मा मे समुन्नद्धम
दोऽजमानिनः ॥ २९ ॥ श्रीभगवानुवाच ॥ ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितं ॥ सरहस्यं तदंगं च गृहाण गदितं
मया ॥ ३० ॥ यावानहं यथाभावो यद्रूपगुणकर्मकः । तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥ ३१ ॥ अहमेवा
समेवाग्रे नान्यद्यत्सदसत्परं ॥ पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहं ॥ ३२ ॥

स्य साधनं च ॥ ३० ॥ ननु त्वद्दर्शने समर्थोऽहं कथं ज्ञानाधिकारी स्यां तत्राह । यावानिति ॥ यावान् स्वरूपतः ॥ यथाभावो यथाप्रकारेण
व नवाभातिः ॥ यद्रूपगुणकर्मकः यानि रूपाणि गुणाः कर्माणि च यस्य ॥ ३१ ॥ एतदेव सम्यगुपदिशन् यावानित्यस्यार्थं स्फुटयति ॥
अहमेवाग्रे सृष्टेः पूर्वमासं स्थितः नान्यत्किंचित् यतः सत् स्थूलं ॥ असत् सूक्ष्मं । परं तयोः कारणं प्रधानं तस्यापि अंतर्मुखतया
तदा मय्येव लीनत्वात् ॥ अहं च तदासमेव ॥ अनेन चानाद्यनंतत्वात् द्वितीयत्वापरिच्छिन्नोऽहमित्युक्तं भवति ॥ ३२ ॥

यथात्ममायायोगेनेत्यनेनमायाआपिरत्वाद्दत्यमारोपयोगित्वाद्धमायांनिरूपयति ऋतेर्थविनैपिवाभवमर्थपद्यतः किमा
यानिरुक्तंआत्मन्यधिष्ठितप्रतीयते॥ सदपिचनप्रतीयेततन्तत आत्मनोममायांविद्यात यथाआनासोद्विचंदादिरिति। अर्थ
विनाप्रतीतौदृष्टांतः॥ यथातम इतितमोराहुर्यथाग्रहमंडलेस्थितोपिनदृश्यते॥ सतोप्रतीतौदृष्टांतः॥ ३३॥ यथात्मेव इत्येतत्स्पु
ष्टयति॥ यथामहान्तिभूतानिनीतेषुअनुस्थेरतंतरंप्रविष्टानितेउपलभ्यमानत्वात॥ अप्रविष्टानिचप्रागेवकारणतयातेषुवि
द्यमानत्वात। तथातेषुनततोतिकेषहं॥ नचतेषहंएवंनतामममसत्तेत्यर्थः॥ ३४॥ साधनमाह॥ आत्मनस्तत्त्वजिज्ञासुनाग

ऋतेर्थयत्प्रतीयेतनप्रतीयेनचात्मनि॥ तद्विद्यादात्मनोमायांयथाभासोयथातमः॥ ३३॥ यथामहांतिभूता
निभूतेषूच्चावचेष्वनु॥ प्रविष्टान्यप्रविष्टानितथातेषुनतेष्वहं॥ ३४॥ एतावदेवजिज्ञास्यंतत्त्वजिज्ञासुनात्म
नः॥ अन्वयव्यतिरेकाभ्यांयत्स्यात सर्वत्रसर्वदा॥ ३५॥ एतन्मतंसमातिष्ठपरमेणसमाधिना॥ भवानकल्पविक
ल्पेषुनविमुह्यतिकर्हिचित॥ ३६॥ श्रीशुकउवाच॥ संप्रदिश्यैवमजनोजनानांपरमेष्ठिनं॥ पश्यतस्तस्यतद्रूपमा
त्मनोन्यरुणद्धरिः॥ ३७॥ अंतर्हितेंद्रियार्थायहरयेविहितांजलिः॥ सर्वभूतमयोविश्वंससर्जेदंसपूर्ववत॥ ३८॥

तावत्त्वमेवजिज्ञास्यंनिश्चार्यंतदेवाह॥ अन्वयकार्येषुकारणत्वेनानुवृत्तिः कारणावस्थायांचतेभ्योव्यतिरेकः। तयाजाग्रदाद्य
वस्थासुतत्साक्षितयान्वयः। व्यतिरेकश्चसमाध्यादौ एवमन्वयव्यतिरेकाभ्यांयत सर्वत्रसर्वदास्यात्तदेवात्मेति॥ अन्वयव्य
तिरेकसाधनेनात्माजिज्ञास्यइत्यर्थः॥ ३५॥ यत्त्वयार्थितनेहमानः। प्रजाःसर्जमितितत्प्रसादीकरोतिएतन्मतंसम्यगनुष्ठितसम
ाधिनाचित्तेकारणेनकल्पेषुविकल्पाः विविधाःसृष्टयस्तेषुविमोहकत्वाभिमिदेशनायास्यतीति॥ ३६॥ एवंसंप्रदिश्यउपदि
श्यजनानांपरमेष्ठिनंपरमेस्थानेअधिपत्येस्थितंब्रह्माणंआत्मनेस्तदृपंत्यरुणात अंतर्हितवान॥ ३७॥ इंद्रियार्थः प्रत्यक्षरू

भा० द्वि० ३८ तदनंतरं पूर्वोक्तो ब्रह्मनारदसंवादः प्रवृत्त इत्याह । प्रजापतिरिति पंचभिः । प्रजानां भद्रमन्विच्छन् विभूत्तरान् सेवन् स्वार्थकाम्याय
प्रयोजनेच्छया यायमनियमानातिष्ठत् ॥ ३९ ॥ रिक्थादानां पुत्राणां मध्ये प्रियतमः ॥ तं पितरं सेवमानः शीलादिना परितो-
षयामासेति द्वयोरन्वयः । किमिच्छन् विष्णोर्मायां विविदिशन् निशामद्रष्टुं ज्ञातुं वेत्यर्थः ॥ मामो ४२ भगवता चतुःश्लोक्या सं-

प्रजापतिर्धर्मपतिरेकदा नियमान् यमान् । भद्रं प्रजानामन्विच्छन्नातिष्ठन् स्वार्थकाम्यया ॥ ३९ ॥ तं नारदः
प्रियतमो रिक्थादानामनुव्रतः ॥ शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥ ४० ॥ मायां विविदिषन् विष्णो-
र्मायेशस्य महामुनिः महाभागवतो राजन् पितरं पर्यतोषयत् ४१ ॥ तुष्टं निशाम्य पितरं लोकानां प्रपितामहं
देवर्षिः परिपप्रच्छ भवान् यन्मानुपृच्छति ४२ ॥ तस्मा इदं भागवतं पुराणं दशलक्षणं ॥ प्रोक्तं भगवता प्राह प्री-
तः पुत्राय भूतकृत् ४३ ॥ नारदः प्राह मुनये सरस्वत्यास्तटे नृप । ध्यायते ब्रह्म परमं व्यासायामिततेजसे ४४
यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदं ॥ यथासीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ॥ ४५ ॥ इति श्री
भागवते महापुराणे द्वितीयस्कंधे नवमोऽध्यायः ॥ ९ ॥

क्षेपेण प्रोक्तं विस्तरेणाह दशलक्षणानि लक्षणीया अर्था विद्यंते यस्मिन् तत् ४३ । तत्संप्रदायतो भागवतं मया ज्ञातमित्याशयेना-
ह । नारद इति ॥ ४४ । भागवतव्याख्यानेनैव त्वत्प्रश्नानामुत्तरं दास्यामीत्याह । यदुतेति ॥ पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः । इ- ३८
त्यादिना विराजात्पुरुषादिदं विश्वं कथमासीदित्येतदहं त्वया पृष्टः । तद्यथावदुपाख्यास्ये एवेति ४५ ॥ इति द्वितीये नवमः ॥

८२

ततो भागवतव्याख्याधारैर्वध्यमानमे स्फुटं ॥ राज्ञः प्रश्नोत्तरं वक्तुमारेभे वादरायणिः ॥१॥ दशलक्षणं पुराणं प्राहेत्युक्तं तानि दशलक्ष-
णानि दर्शयति ॥ मन्वंतराणि ईशानुकथा चेति द्वंद्वः सर्गादयो अत्र दशार्था लक्ष्यंते ॥१॥ नन्वेवमर्थभेदाच्छास्त्रभेदः स्यात्तत्राह । दशमस्य
स्म स्याश्रयस्य विशुद्ध्यर्थं तत्त्वज्ञानार्थं नवानां लक्षणं स्वरूपं एकस्यैव प्राधान्यान्नायं दोष इत्यर्थः ॥ नन्वत्र नैवं प्रतीयते अत आह
श्रुतेन श्रुत्यैव स्तुत्यादिस्थानेषु ॥ अंजसा साक्षाद्दर्शयति ॥ अर्थेन तात्पर्यवृत्त्या च तत्तदाख्यानेषु ॥२॥ सर्गादीनां क्रमेण लक्षं-
लक्षणमाह ॥ भूतानि आकाशादीनि इंद्रियाणि च धीशब्देन महदहंकारो गुणानां वैषम्यात् परिणामात् ॥ ब्रह्मणः परमेश्व-

श्रीशुक उवाच ॥ अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ॥ मन्वंतरेशानुकथा निरोधो मुक्तिराश्रयः ॥१॥ दश-
मस्य विशुद्ध्यर्थं नवानामिह लक्षणं ॥ वर्णयंति महात्मानः ॥ श्रुतेनार्थेन चांजसा ॥२॥ भूतमात्रेंद्रियधियां ज-
न्म सर्ग उदाहृतः ॥ ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः ॥३॥ स्थितिर्वैकुंठविजयः पोषणं तदनुग्र-
हः ॥ मन्वंतराणि सद्धर्म ऊतयः कर्म्मवासनाः ॥४॥ अवतारानुचरितं हरेरस्यानुवर्त्तिनां ॥ पुंसामीशकथाः ॥
प्रोक्ता नानाख्यानोपबृंहिताः ॥५॥

रात् च भूतादीनां च विराट्रूपेण स्वरूपेण स्वरूपतश्च जन्म सर्गः ॥३॥ विसर्गमाह ॥ पुरुषो वैराजः
ततः ब्रह्मतः पौरुषः चराचरसर्गो विसर्ग इत्यर्थः ॥३॥ स्थानमाह ॥ वैकुंठस्य भगवतो विजयः । सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः स्थि-
तिः स्थानं स्वभक्तेषु तस्यानुग्रहः ॥ पोषणं तदनुगृहीतानां संमतां मन्वंतराधिपतीनां धर्म्मः कर्म्मणां वासना वै भूततत् संताने ऊयंते क-
र्म्मभिः ॥ संतन्यंत इत्यूतयः ॥ यद्वा वध्यार्थान संश्लेषार्थाद्वा ऊयतेर्धातोरिदं रूपं । ऊयंते कर्म्म निबध्यंते इति वा ऊतय इत्यर्थः ॥४॥ हरेर-
वतारानुचरितं अस्यानुवर्त्तिनां च महत्कथा ईशानुकथा प्रोक्ता इत्यर्थः ॥५॥

भा० द्वि० निरोधमाह । अस्यात्मनो जीवस्य हरेर्योगनिद्रामनुप्रश्चात् शक्तिभिस्स्वोपाधिभिः सह स्वयनं लयः निरोधः अन्यथा रूपं अविद्यया
३९ ध्यस्तं कर्तृत्वादि हित्वा स्वरूपेण ब्रह्मतया व्यवस्थितिर्मुक्तिः ६ ॥ आभासः सृष्टिर्निरोधो लयश्च यतो भवति । अध्यवसीयते प्रका
ति शते च स ब्रह्मैव परमात्मेति प्रसिद्धः स आश्रयः कथ्यते ७ ॥ आश्रयस्वरूपमपरोक्षतया अनुभवेन स्पष्टं दर्शयितुमध्यात्मादि विभागमा
ह ७ ॥ योयमध्यात्मिकः पुरुषः चक्षुरादिकरणाभिमानी द्रष्टा जीवः स एवाधिदैविकः । चक्षुराद्यधिष्ठाता सूर्यादिः ॥ तत्रैवं
कस्मिन्नेव द्रष्टृ यो द्विरूपो विच्छेदो यस्मात् तथाविधोसावधिभौतिकः । चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः । पुरुष इति पुरुष
म जीवस्योपाधिः स वा एष पुरुषोन्नरसमय इत्यादि श्रुतेः ८ ॥ एकमेकतराभाव इत्येतेषामन्योन्यसापेक्षसिद्धित्वेनानात्म [illegible] त्वं दर्शि

निरोधोस्यानुशयनमात्मनः सह शक्तिभिः ॥ मुक्तिर्हित्वान्यथा रूपं स्वरूपेण व्यवस्थितिः ॥ ६ ॥ आभासश्च निरोध
श्च यतश्चाध्यवसीयते ॥ स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ७ ॥ योध्यात्मिकोयं पुरुषः सोसावेवाधिदै
विकः ॥ यस्तत्रोभयविच्छेदः सस्मृतो ह्याधिभौतिकः ॥ ८ ॥ एकमेकतराभावे यदा नोपलभामहे ॥ त्रितयं तत्र यो वे
यति । तथाहि दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिध्य द स आत्मा स्वाश्रयाश्रयः ९ ॥ ति ॥ नापि स्थानं च तद्विना करणाव्यव द
त्यनुमेयस्तदधिष्ठाता सूर्यादिः । न च तं विना करणं प्रवर्त्तते । न च तद्विना दृश्यं प्रतीयते एवमेकतरस्याभावे एकं नोपलभामहे । तत्र तस्मात्ता ए
त्रितयं आलोचनात्मकेन प्रत्ययेन यो वेद साक्षितया पश्यति । स परमात्मा आश्रयः ॥ तेषामपि परस्परमाश्रयत्वमस्त्येवेति । तद्व्याव
र्त्त्यं दर्शयति विशेषणं ॥ स्वाश्रयः अनन्याश्रयः । सर्वेषां त्वेषामाश्रयश्चेति तथा च भगवान् वक्ष्यति । द्रूप [illegible] मार्कं वपुरत्र रन्ध्रे परस्प
र सिध्यति । यः स्वतः खे । आत्मा यदेषामपरो य आद्यः । स्वयानुभूत्याखिलसिद्धिरिति एतेन व्यभिचारित्वात्तेषां मायामयत्वम
प्युक्तं । अत एव पुरुषावयवैर्लोकाः सपाला पूर्वकल्पिता । लोकैरमुष्यावयवाः सपालैरित्यंतो नेको विरोधोपि परिहृतः ९ ॥ ३९
ने

उक्तमेवाध्यात्मादिविभागं प्रपंचयन् पृष्टतोहं त्वया प्रष्टो वैराजात्पुरुषादिदं । यथासीत्तदुपाख्यास्य इति । यत्प्रतिज्ञातं तदुत्पत्तिप्रकारमाह । पुरुष इत्यादिना पुरुषो वैराजः ॥ अंडं विनिर्भिद्य पृथक्कृत्य विनिर्गतः । पृथक्स्थित इत्यर्थः ॥ अयनं स्थानं अन्विच्छन् विसृजन् । यतः शुचिः स्वयं अतः शुचिः शुद्धा अपो गर्भोदकसंज्ञाः ॥ असाक्षीत ससर्ज । १० ॥ अप्सु वासं नारायणनामनिरुक्त्या स्पष्टयति तेन अप्सु वासेन यद्यस्मात्पुरुषो नरः । तस्मादुद्भवा यासां ता नारा आपो नरसूनव इति नारायण इत्यर्थः ॥ तदुक्तं आपो ना ५

पुरुषोंडं विनिर्भिद्य यदासौ स विनिर्गतः ॥ आत्मनो यनमन्विछन्नपोस्राक्षीछुचिः शुचिः । १० । तास्ववात्सीत्स्वसृष्टासु सहस्रं परिवत्सरान् ॥ तेन नारायणो नाम यदापः पुरुषोद्भवाः ॥ ११ । द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ॥ यदनुग्रहतः संति न संति यदुपेक्षया ॥ १२ ॥ एको नानात्वमन्विछन् योगतल्पात्समुत्थितः ॥ वीर्यं हिरण्मयं देवो मायया व्यसृजत्त्रिधा ॥ अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः ॥ १३ । अथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच्छृणु ॥ १४ ॥ अंतः शरीर आकाशात्पुरुषस्य विचेष्टतः ॥ ओजः सहो बलं जज्ञे ततः प्राणो महानसुः ॥ १५ ॥

रा इति । प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः । पूर्वं तेन नारायणः ॥ स्मृत इति तस्य प्रपंचमाह ॥ ११ । द्रव्यं उपादानं कर्म निमित्तं जीवो भोक्ता यस्यानुग्रहात्संति कार्यक्षमा भवंतीत्यर्थः । १२ । योग एव तल्पं शय्या तस्मात् वीर्यं सर्जनरूपं देहं हिरण्मयं मायिकं प्रकाशबहुलं तस्यैव प्रपंचः । अथेत्यादिना । १४ । अंतः शरीरे य आकाशः तस्मात् क्रियाशक्त्या तत्र विविधं चेष्टमानस्य सतः ॥ ओजः इंद्रियशक्तिः सहो मनःशक्तिः ततः शक्त्यात्मकात्सूक्ष्माद्रूपात्प्राणः । सूत्राख्यः महान्मुख्यः ॥ स एव असुः अध्यात्मकः प्राणः सर्वेषां । १५ ॥

ऐ०दी०
६०

मह त्वं हर्षयति ॥ प्राणा इंद्रियाणि पंच प्राणा ॥ तं चेष्टां कुर्वंतं ॥ अनुपश्चात्प्राणं ति चेष्टां कुर्वंति अपानं तच्चेष्टां त्यजंतं मनु अपानंती चेष्टा
त्यजंति ॥ राज्ञानमनुव्रत्याद्व। २६ ॥ स्वपता चालयिता तिमिरेतेन अन्नोरिति ॥ स्थुलदेहादिकं विराड्वीवांतं देनोपाममनार्थं मुक्तं ॥ अजायते
स्मातत्तः ॥ उत्तः नत्व यतुमिच्छतु इत्यर्थः ॥ प्राक् उपयमंत निर्भिद्यतविरुक्तमग्नत। १७ ॥ तालु अधिष्ठानं जिह्वा इंद्रियं ॥ नानारसो वि
षयः। वरुणश्च देवता ज्ञातव्या। एवं सर्वत्र अधिष्ठानमिंद्रियं देवता ताविषयस्तेत चतुष्टयमनंतकमप्यह्यं। १८ ॥ विवक्षोः वक्तुमिच्छोः
मुखतएव वह्निर्देवता वाक् इंद्रियं व्याहृतिनाम वर्णं। तयोरिति इंद्रियदेवताधीनत्वं कर्मणो दर्शयति। नन्वस्वति प्राणवायो दोधूय

अनु प्राणं तिर्यं प्राणं प्राणं तं सर्वदेहं तु षु ॥ अपानं तमपानं तिनरदेवमिवानुगाः। १६ ॥ प्राणोनद्धिपतात्क्षुत्तृड्डंत
राडजायत अन्नोः पिपासतोऽस्त तस्य प्राणं मुखं निरभिद्यत। १७ ॥ मुखतस्ता[redacted]लुनिर्भिन्नं जिह्वा तत्रोपजायते। ततो ना
नारसो ज्ञेः जिह्वया योधिगम्यते। १८। विवक्षोर्मुखतो नम्नो वह्निर्वाग्व्याहृतं तयोः ॥ जलेचैतस्य सुचिरं निरोधः स
मजायत। १९। नासिके निरभिद्येतां दोधूयति नभस्वति ॥ तत्र वायुर्गंधवहो घ्राणो नसि जिघृक्षतः ॥ यदात्मनि निरा
लोकमात्मानं च दिदृक्षतः। निर्भिन्ने ह्यक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः। २१ ॥ बोध्यमानस्य क्षुधितस्यात्मनस्तजि
घृक्षतः ॥ कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः। २२ ॥

तिरोधीयमाने अतमंत ज्ञुवति सति ॥ तत्र वत नासिकायां वायुर्देवता
गंधं वहतीति
या ॥ अनेन गंधं विषयो दर्शितः। घ्राणं इंद्रियं जिघृक्षतो गंधं ग्रहीतुमिच्छतः ॥ २० ॥ निरालोकं प्रकाशस्य त्वं आत्मा दितिशेषनि
र्भेदकव व्यापी नावः। तदा आत्मानं देहं वकारात्मच्छ वस्तु दिदृक्षत अक्षिणी स्थानं। ज्योतिः आदित्यो देवता। चक्षुरिंद्रियं ततो गु
णस्य रूपस्य ग्रहणं अनेन रूपं विषयो दर्शितः ॥ २१ ॥ क्षुधिने वैदो बोध्यमानस्य तत आत्मनः। प्रबोधं ग्रहीतुमिच्छतः। ततो गु

[illegible] ॥

मृदुत्वं च काठिन्यं च लघुत्वं च आद्यस्त्वं शीतत्वं चेत्यर्थः ॥ यद्यप्युष्णत्वं मयोंद्रियविषय एव तथात्तु स्पर्डिग्रह्यत्वाच ॥ दोष्णमि-
त्युक्तं गुर्वेष्मेति पाठे । यणादेशश्छांदसः । वस्तुन एतान् धर्मान् डिघृक्षतस्त्वक् निर्भिन्ना त्वगिंद्रियधिष्ठानं च मे जातमित्य-
र्थः ॥ तस्या रोमाणि इंद्रियं महीरुहाश्च देवता । ज्ञातावस्तु निहस्तेनातो लि तैल घुलगुरुत्वयोर्ज्ञानात्तयोरपि त्वगिंद्रियविष-
यत्वमिति पौराणिकाः ॥ २३ ॥ तत्र त्वचि । अंतर्बहिश्च वातो वसः ॥ आवश्यस्थितः कर्तरि निष्ठा कर्मण्यतः ॥ त्वचाथो गुणस्पर्शो- ल
ये वश्यमर्थः ॥ त्वागिंद्रियमेव वहिः । कंडूतिसहितं स्पर्शं गृह्णन् लोमशाचेनोच्यते ॥ तत्र महीरुहाणां देवत्वं । अंतर्बहिश्च स्पर्शे

वस्तुनो लघुकाठिन्यमृदुगुर्वोष्णशीततां ॥ डिघृक्षतस्त्वक् निर्भिन्ना तस्यां रोममहीरुहाः ॥ २३ ॥ तत्र चांतर्ब-
हिर्वायुः त्वचा लब्धगुणो वृतः ॥ हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया ॥ २४ ॥ तयोस्तु बलवानिंद्र आ-
दानमुभयाश्रयं ॥ गतिं जिगीषतः पादौ रुरुहातेभिकामिकां ॥ २५ ॥ पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते
नृभिः ॥ २६ ॥

गृह्णन् तदेव त्वक्शब्देनोच्यते ॥ तत्र वातो देवता तया च तत्तीयेवक्ष्यति ॥ त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः । अं- वि
शेन लोमभिः कंडूं यैरसौ प्रतिपद्यते निर्भिन्नानि चर्माणि लोकपालोनिलो विशत् ॥ प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यत इ-
ति ॥ तत्र चर्म्माणीति चर्मोपलक्षितान्यंगानीत्यर्थः ॥ प्राणेनांशेनेति ॥ प्राणवायुव्याप्तेन त्वगिंद्रियं इंद्रो देवता तदुभयाश्रयं आ-
दानकर्म ॥ २४ ॥ अभिकामिकां अभिप्रेतां । विहितामित्यर्थः ॥ पद्भ्यां महायज्ञो विष्णुरेव स्वयं तदधिष्ठातृरूपेण स्थितः । कर्मभिरि-
ति गत्यात्मकैः कर्मशक्तिरिंद्रियं मुक्तं हव्यं क्रियत इति गतिलक्षणाया यत्रार्थेंद्रियविषयस्त्युक्तं निर्दिशति । व्यष्टिजीवेष्वपि इ-
यमेव रीतिर्दर्शयन्नाराधिकारित्वं पद्भ्यादीनां दर्शयति ॥ २६ ॥

मा०टि० प्रजाऽऽप्यतं आनंदो रतिः अमृतं स्वर्गादि तदर्थिनः शिश्नोऽधिष्ठानं उपस्थ इंद्रियं प्रजापतिश्चासीदिति द्वयं । तदुभयाश्रयं क
८२ र्मणो स्त्रीसंभोगानां संबंधि प्रियं सुखं ॥ २६ ॥ धर्तुं मलं भुक्तान्नादीनां असारांशं त्यक्तुमिच्छोः । गुदं पायुर्मित्रोत्सर्गोऽधिष्ठानें
द्रियदेवताविपर्ययः ॥ २७ ॥ एष्यद्देहात् पुरः देहांतराणि आसिसृप्सोः सर्वतो गंतुमिच्छोः निरभिद्यतेत्यनुषंगः । अपानतः ।
अपगच्छतः ॥ एषस्त्कामरणं नाभ्यादीन्यधिष्ठानादीनि तान्याहि प्राणापानयोर्वै धाविश्लेषं मृत्युरिति प्रसिद्धं । २८ ॥ आ

निरभिद्यत शिश्नो वै प्रजानंदामृतार्थिनः ॥ उपस्थ आसीत् कामानां प्रियं तदुभयाश्रयं ॥ २६ ॥ उत्सिसृक्षोर्धा
तुमलं निरभिद्यत वै गुदं ॥ ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः ॥ २७ ॥ आसिसृप्सोः पुरः पुर्या नाभिद्वा
रमपानतः ॥ तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयं ॥ २८ ॥ आदित्सोरन्नपानानामासन् कुक्ष्यंत्रनाड्यः
नद्यः समुद्राश्च तयोः पुष्टिः तुष्टिस्तदाश्रये ॥ २९ ॥ निदिध्यासोरात्ममायां हृदयं निरभिद्यत ॥ ततो मनस्त
तश्चंद्रः संकल्पः काम एव च ॥ ३० ॥

अन्नपानामादित्सोः संग्रहेच्छोः कुक्षिश्च अंत्राणि च नाड्यश्चासन् तत्र कुक्षिरधिष्ठानं अंत्राणि अन्नसंग्रहे करणमिंद्रियस्थानीयं ना
कर ड्यस्तु पानसंग्रहेणे । तयोर्नाड्यंत्रवर्गयोः क्रमेण नद्यः समुद्राश्च देवता तुष्टिरुदरभरणं पुष्टिस्तु रसपरिणामतः स्थौल्यं त णा
दाश्रये तदुभयनिमित्ते । तत्रान्नसंग्रहेच्छोः कुक्षिरन्नसमुद्रस्तत्पयः इति चतुष्पर्यायः सप्तके कुक्ष्यंत्रनाडी नदी पुष्टयः इति विवेकः । न
२९ ॥ निदिध्यासोः । निरंतरं चिंतयितुमिच्छोः कामो अभिलाषः हृदयं मनः चंद्रः संकल्पः अधियात्मादयः ॥ ३० ॥ तदेवमधिदैवा
दिभेदं विविच्य अंतःकरणस्य तत्त्वानां धात्वादीनां स्वरूपमाह ॥ ३० ॥ ८२

तदेवमधिदैवादिभेदं विनत्योत्क्रान्तस्य शान्ततानां धात्वादीनां स्वरूपमाह । त्वगिति द्वाभ्यां ॥ त्वक् स्थूलं च चर्म तदुपरिस्थितं
सूक्ष्मं त्वगादयोऽस्थ्यन्ताः द्वंद्वैकवद्भावेन निर्दिष्टाः । सप्तैते धातवः तेन्न भूम्यप्तेजोमयाः । तेषां पांचभौतिकत्वेऽपि वाह्याकाशयो
राहादिरूपेण संबंधकत्वान्नावादेव युक्तं । ३१ । गुणात्मकानि गुणोक्षुब्धबुद्ध्यादिप्रधानात्मा ये कांतानि विषयात्तिमुखत्वं त्वा
वानीत्यर्थः ॥ गुणाः शब्दादयः । भूतादिरहंकारस्ततः प्रकर्षेण भवंतीति तथा ॥ अहंकारकल्पितत्वाच्चोक्तनस्त्वनावनवस्तु
येत्यर्थः अत्र हेतुः । यतो मन एव सर्वविकाराणामात्मा स्वरूपं बुद्धिस्तु तत्पान्तार्थं विज्ञानरूपिणी न तु परमार्थ

त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः ॥ भूम्यप्तेजोमयाः सप्त प्राणो व्योमांबुवायुभिः ॥ ३१ ॥ गुणा
त्मकानींद्रियाणि भूतादिप्रभवा गुणाः ॥ मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ॥ ३२ ॥ एतद्भगवतो
रूपं स्थूलं ते व्याहृतं मया ॥ मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतं । ३३ ॥ अतः परं सूक्ष्मतममव्यक्तं
निर्विशेषणं । अनादिमध्यनिधनं नित्यं वाङ्मनसः परं ॥ ३४ ॥ अमुनी भगवद्रूपे मया तेऽनुवर्णिते । उ
भे अपि न गृह्णंति मायासृष्टे विपश्चितः ॥ ३५ ॥ सोऽस्वरूपं वोक्तं । ३२ ।
ग्राहिणीति वैराज्यार्थमुक्तं । अनेनैव बुद्धिमन
उपसंहरति । एतदिति अष्टभिर्महादिभिः । ३३ ॥ स्थूलमुक्त्वा सूक्ष्मं समष्टिं शरीरमाह । अतः परं अस्याकारस्य मूर्तं सूक्ष्म ग
यं तमं अतींद्रियत्वात् । अव्यक्तं तत्कुतः यतो निर्विशेषणं तत्कुतः । अनादिमध्यनिधनं उत्पत्तिस्थितिलयशून्यं नित्यं सदैक
रूपं । अव्ययादित्यनित्यमित्यर्थः । अतएव वाङ्मनसयोरेतिद्वे देवं तस्मात्परं ३४ । उपासनार्थं भगवत्यारोपितं रूपद्वयमु
पवदति । अमुनी इति । अमुनी कार्यकारणरूपे न गृह्णंति न स्वतो नाङ्गीकुर्वंति यतो मायासृष्टे । ३५ ॥ यद्रूपगुणक
र्मक इति यदुक्तं भगवता ब्रह्माणं ॥ अतितरां पंचविधं तु ब्रह्मादिरूपाणि तत्कर्माणि चाह स इत्यादिना इत्यंतेनावेनेत्यतः

भा० द्वि० आकृतेन ग्रंथेन सन् भगवान् ब्रह्मरूपस्तत्सन् वाच्यवाचकतया ॥ वाचकतया नामानि वाच्यतया रूपाणि क्रियाश्च धत्ते स्वउती
६२ तर्थः । मायया सकर्मा सव्यापारः । वस्तुतस्त्वकर्मकः । एतत्प्रपंचयति ३६ ॥ प्रजापतीनिति सार्द्धैस्त्रिभिः ॥ द्वितीयांतानां धत्त
इत्यर्थेनान्वयः । तत्र प्रजापत्यादीनि नामानि तदाख्यानि रूपाणि तत्कर्माणि चेष्टायानि । पृथगिति तत्तदवांतरभेदेन । गिरीनिति
अस्यानंतरं नृपेति संबोधनं ३९ ॥ द्विविधाः स्थावरजंगमरूपेण चतुर्विधा जरायुजांडस्वेदजोद्भिज्जरूपेण जलस्थलना-

स वाच्यवाचकतया भगवान् ब्रह्मरूपधृक् ॥ नामरूपक्रिया धत्ते सकर्माकर्मकः परः ॥ ३६ ॥ प्रजाप
तीन् मनून् देवान् ऋषीन् पितृगणान् पृथक् ॥ सिद्धचारणगंधर्वान् विद्याध्रासुरगुह्यकान् ॥ ३७ ॥ किं
नराप्सरसो नागान् सर्पान् किंपुरुषोरगान् ॥ मातृरक्षः पिशाचांश्च प्रेतभूतविनायकान् ॥ ३८ ॥ कूष्मां
त डोन्मादवेतालान् यातुधानान् ग्रहानपि ॥ खगान् मृगान् पशून् वृक्षान् गिरीन् नृप सरीसृपान् ॥ ३९ ॥ द्वि
विधाश्चतुर्विधा येन्ये जलस्थलनभौकसः । कुशलाकुशला मिश्राः कर्मणां गतयस्त्विमाः । ४० ॥ सत्वं
रजस्तम इति तिस्रः सुरनृनारकाः ॥ तत्राप्येकैकशो राजन् भिद्यंते गतयस्त्रिधा । ४१ । यदैकैकतरोन्याभ्यां
स्वभाव उपहन्यते । ४२ ॥

नांसि द्वेकासि येषां ते । निविधान्ते इति पूर्वेणान्वयः ॥ यद्वा राजसूयं यावत्यः । कर्म गतयो याद
शीं दिदृक्षत्त मेति ॥ तस्यापि प्रसंगात्तदेनैवोत्तरमाह । कुशला उत्तमाः अकुशला नीचाः मिश्रा इति पर्यंतरं मिश्राः । मध्यमाः क स
पु पो र्मणां पुण्यमिश्राणां गतयः फलानि ४० ॥ सत्वादिभेदेन कर्मगतिवैचित्र्यं प्रपंचयति ॥ सत्वमिति सार्द्धेन सत्वादय
स्तिस्रो गतयः ॥ सुरादिशब्दाः रूपादीनामुपलक्षणार्थाः अन्याभ्यां गुणाभ्यां स्वभावो गुण उपहन्यते अनुविधीयते ४२ ॥ ६२

ब्रह्मरूपेण स्रष्टृत्वमुक्त्वा विष्णुरूपेण पालकत्वमाह । स एव भगवान् तिर्यगाद्यवतारैरिदं विश्वं स्थापयन् पालयन् ध-
र्म्मरूपेण पुष्णाति भोगैः । संवर्द्धयति ॥ ६३ ॥ रुद्रेण रूपेण संहर्तृत्वमाह तत इति आत्मनः सकाशाद्यदिदं सृष्टं तत् का-
लाग्निरूपेण संनियच्छति । संहरति ॥ ६४ ॥ कर्तृत्वाद्यपवादेन तद्रूपमस्य शुद्धिमाह ॥ इत्थंभावेन स्रष्टृत्वादिरूपेण तस्मा-
द्वा एतस्मादात्मनः । आकाशः संभूतः सोऽकामयत । बहु स्यां प्रजायेयेत्यादि श्रुतिभिः कथितः ॥ स्वरूपस्तु परं केवलमे-

स एवेदं जगद्धर्त्ता भगवान् धर्म्मरूपधृक् ॥ पुष्णाति स्थापयन्विश्वं तिर्यङ्नरसुरात्मभिः ॥ ६३ ॥ ततः
कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः ॥ संनियच्छति कालेन घनानीकमिवानिलः ॥ ६४ ॥ इत्थंभावेन भ-
कथितो भगवान् भगवत्तमः ॥ इत्थंभावेन हि परं द्रष्टुमर्हन्ति सूरयः ॥ ६५ ॥ नास्य कर्म्मणि जन्मादौ
परस्यानुविधीयते ॥ कर्तृत्वप्रतिषेधार्थं मायया रोपितं हि तत् ॥ ६६ ॥

नरूपेण सोऽवृ द्रष्टुं नार्हन्ति ॥ ६५ ॥ तत्कियतः । अस्य विश्वस्य जन्मादौ कर्म्मणि परस्येश्वरस्य इत्थंभावः । कर्तृत्वं नास्ति ॥ श्रु-
त्यापि तात्पर्येण न प्रतिपाद्यते किंतु ॥ अनुविधीयते ॥ अनुवर्त्यते ॥ किमर्थं प्रतिषेधार्थं हि यतो मायया तदारोपितं प्रा-
काशितं तथा च श्रुतिः । निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं ॥ इन्द्रो मायाभिः ॥ पुरुरूप ईयत इत्याद्या ॥ ६६ ॥

भा०द्वि० उक्तमर्थमुपसंहरति ॥ अयं त्विति ॥ अयं ब्राह्मणः संबंधी कल्पो महाकल्पः विकल्पो वा अवांतरः । तत्सहितः उदाहृतः
६३ उदाहरणत्वेन संक्षेपत उक्तः कथंभूतः यत्र महाकल्पे प्राकृताः । महदादिसर्गाः ॥ अवांतरकल्पे च वैकृताः स्थाव
रादिसर्गा इत्ययं विधिः ॥ प्रकारः अन्यैर्महाकल्पादिभिः साधारणः । ४७ ॥ वक्ष्यमाणविस्तारं प्रतिजानीते परिमा
णं स्थूलसूक्ष्मं च कल्पस्य लक्षणं ॥ इयान एवंरूप इति तद्विग्रहं ॥ अवांतरकल्पमन्वंतरादिरूपं विभागं च यथा

अयं तु ब्राह्मणः कल्पः सविकल्प उदाहृतः ॥ विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ॥ ४७ ॥ परिमाणं
च कालस्य कल्पलक्षणविग्रहं ॥ यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु ॥ ४८ ॥ शौनक उवाच
यदाह नो भगवान् सूत क्षत्ता भागवतोत्तमः ॥ चचार तीर्थानि भुवः त्यक्त्वा बंधून् सुदुस्त्यजान् । ४९ ॥ क्षु
त्तः कौषारवेस्तस्य संवादोऽध्यात्मसंश्रितः ॥ यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वमुवाच ह ॥ ५० ॥ ब्रूहि नस्तदिदं
सौम्य विदुरस्य विचेष्टितं ॥ बंधुत्यागनिमित्तं च तथैवागतवान् पुनः । ५१ ॥

वक्ष्ये विस्तरेण पुरस्तात् । तृतीयस्कंधे व्याख्यास्यामि ॥ तत्र प्रथमं हि रण्यगर्भस्तत्संबंधितं पाद्मं कल्पं अथो इति कार्त्स्न्येन व्याख्या
स्यमानं शृणु । यद्यपि सर्गादिनिरूपणं तदेव सात्वत श्रोतुकामः कथांतरं पृच्छति शौनकः ॥ यदाहेति । भुवः संबंधीनि ।
ती तीर्थानि भुवः क्षेत्राणि चेति ४९ कौषारवेर्मैत्रेयस्य तस्य क्षत्तुश्च अध्यात्मज्ञानसंश्रितः संवादः ॥ ५० ॥ पुनरागत
ति वान् तच्च निमित्तं ब्रूहि । ५१ ॥ ६३

श्रीभा० द्वि०
६४

राज्ञा पृष्ट इति अयमर्थः ॥ यत एवं पृष्टः इदमेव राजापि शुकं पृष्टवान् । शुकोपि विदुरमैत्रेयसंवादं पुरस्कृत्य ये पूर्वं राज्ञा कृताः प्रश्ना : व
तदनुसारेणैव पुराणार्थमवोचत् ॥ तदेवाहं वोभिधास्यामि तथैव शृणुतेति ॥ ५१ ॥ - - - - - - ये न स्वद्ब्रह्मसुखतोमि
तं ॥ ब्रह्मनारदयोः प्रोक्तं तं वंदे गुरुमीश्वरं ॥ १ ॥ यत्सूत्रयं त्रितं विष्वंनरीनर्त्तिजगत्त्रयं ॥ संतत्तमेव पृच्छेलुपदत्रस्खलितं
मम ॥ २ ॥ द्वितीयस्कंधसंबंधपदभावार्थदीपिका । उद्दीप्यतामियं सद्भिः ॥ यथा स्यात्तत्वदीपिका । ३ ॥ ईक्षतामिच्छयासंतः ॥

श्रीसूत उवाच ॥ राज्ञा परीक्षिता पृष्टो यदवोचन्महामुनिः ॥ तद्वोभिधास्ये शृणुत राज्ञः प्रश्नानु
सारतः ॥ ५१ ॥ इति श्रीभागवते महापुराणे अष्टादशसाहस्र्यां संहितायां वैयासिक्यां
द्वितीयस्कंधे दशमोध्यायः ॥ १० ॥ समाप्तोयं द्वितीयस्कंधः ॥ २ ॥

हमतां ममसाहसं ॥ मयाहि स्वीयबोधाय कृतमेतन्न सर्वतः ॥ ४ ॥ द्वितीयस्कंध इति पृष्टस्य संबंधबंधुरः ॥ अध्यायै दश
भिर्व्याख्यो जगत्संस्तुतिनाशनः ५ ॥ इति श्रीभागवतभावार्थदीपिकायां श्रीधरस्वामिविरचितायां द्वितीयस्कंधे दशमोध्यायः १० ॥
संवत् १८ ३७ मासोत्तममासे चैत्रमासे कृष्णपक्षे तिथौ मावस्यायां शनिवासरे ॥ ॥ लिष्यकृतं ब्राह्मण बालकृष्ण ॥ पठनार्थं
श्रीस्वामीजी श्री श्री श्री चैतन्यदासजी को शिष्य गंगाविष्णुदासजी स्वयंपठनार्थे शुभं मंगलं भूयात् श्रीराधाकृष्ण जयती ॥ ६६